कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 369 विषय पुराण.
नांव अद्भुत रामायण.
लेखक/लिपीकार —.
पृष्ठ ९५.
काळ संवत 1988 पूर्ण/~~अपूर्ण~~.

Checked 2012

॥अथश्रीमदद्भुतरामायणंप्रारभ्यते॥

अ० ॥श्रीगणेशायनमः॥ ॥नारायणंनमस्कृत्यनरंचैवनरोत्तमं॥देवींसरस्वतींव्यासंततोजयमुदीरयेत्॥
दुं० १॥नमस्तस्मैमुनींद्रायश्रीयुताययशस्विने॥शांतायवीतरागायवाल्मीकायनमोनमः॥२॥रामायराम
भद्रायरामचंद्रायवेधसे॥रघुनाथायनाथायसीतायाःपतयेनमः॥३॥जयतिरघुवंशतिलकःकौश
१ ल्यानंदवर्द्धनोरामः॥दशवदननिधनकारीदाशरथिःपुंडरीकाक्षः॥४॥ ॥तमसातीरनिलयंनिलयं
तपसांगुरुं॥वचसांप्रथमस्थानंवाल्मीकिंमुनिपुंगवं॥१॥विनयावनतोभूत्वाभारद्वाजोमहामुनिः॥
अपृच्छत्तंमतःशिष्यःकृतांजलिपुटोवशी॥२॥रामायणमितिख्यातंशतकोटिप्रविस्तरं॥प्रणीतंभव
तायच्चब्रह्मलोकेप्रतिष्ठितं॥३॥श्रूयतेब्राह्मणैर्नित्यमृषिभिःपितृभिःसुरैः॥पंचविंशतिसाहस्रंरामाय
णमिदंभुवि॥४॥तदाकर्णितमस्माभिःसविशेषंमहामुने॥शतकोटिप्रविस्तारेरामायणमहार्णवे॥५
॥किंगीतमिहमुख्यातितन्मेकथयसुव्रत॥आकर्ण्यदिरिणःपृष्टंभारद्वाजस्यवैमुनिः॥६॥हस्तामलक
वत्सर्वंसस्मारशतकोटिकं॥ओमित्युक्त्वामुनिःशिष्यंप्रोवाचवदतांवरं॥७॥भारद्वाजचिरंजीवसाधु॥ रा०
स्मारितमद्यनः॥शतकोटिप्रविस्तारेरामायणमहार्णवे॥८॥रामस्यचरितंसर्वमाश्चर्यंसम्यगीरितं॥पंच १

विंशतिसाहस्रं नृलोके यत्प्रतिष्ठितं ॥ ९ ॥ नृणां हि सदृशं रामचरितं वर्णितं ततः ॥ सीतामाहात्म्यसारं यद्धि
शेषादत्र नोक्तवान् ॥ १० ॥ शृणुष्वावहितो ब्रह्मन्काकुत्स्थचरितं महत् ॥ सीतायामूलभूतायाः प्रकृतेश्चरितं मह
त् ॥ ११ ॥ आश्चर्यमाश्चर्यमिदं गोपितं ब्रह्मणो गृहे ॥ हिताय प्रियशिष्याय तुभ्यमावेदयामि तत् ॥ १२ ॥ जानकी
प्रकृतिः सृष्टेरादिभूता महागुणा ॥ तपःसिद्धिः स्वर्गसिद्धिर्भूतिर्भूतिमतां सती ॥ १३ ॥ विद्याविद्या च महती गीय
ते ब्रह्मवादिभिः ॥ ऋद्धिः सिद्धिर्गुणमयी गुणातीता गुणात्मिका ॥ १४ ॥ ब्रह्म ब्रह्मांडसंभूता सर्वकारणकारणं ॥
प्रकृतिर्विकृतिर्देवी चिन्मयी चिद्विलासिनी ॥ १५ ॥ महाकुंडलिनी सर्वानुस्यूता ब्रह्मसंज्ञिता ॥ तस्या विलसितं स
र्वं जगदेतच्चराचरं ॥ १६ ॥ यामाधाय हृदि ब्रह्मन्योगिनस्तत्त्वदर्शिनः ॥ विघट्टयंति हृद्ग्रंथिं भवंति सुखमूर्त्ति
काः ॥ १७ ॥ यदा यदा हि धर्मस्य ग्लानिर्भवति सुव्रत ॥ अभ्युत्थानमधर्मस्य तदा प्रकृतिसंभवः ॥ १८ ॥ रामः सा
क्षात्परं ज्योतिः परं धाम परः पुमान् ॥ आकृतौ परमो भेदो न सीतारामयोर्यतः ॥ १९ ॥ रामः सीता जानकी रामभ
द्रो नाणुर्भेदो नैतयोरस्ति कश्चित् ॥ संतो बुध्वा तत्त्वमेतद्धि बुद्धाः पारं याताः संसृतेर्मृत्युवक्त्रात् ॥ २० ॥ रामोचिं
त्यो नित्यचित्सर्वसाक्षी सर्वांतस्थः सर्वलोकैककर्ता ॥ भर्ता हर्तानंदमूर्तिर्विभूमा सीता योगाच्चिंत्यते योगिभिः

सः॥२१॥अपाणिपादोजवनोग्रहीता पश्यत्यचक्षुःसश्रृणोत्यकर्णः॥सवेत्तिविश्वंनहितस्यवेत्तातमाहुरग्र्यंपुरुषं
पुराणं॥२२॥तयोःपरंजन्मउदाहरिष्येययोर्यथाकारणदेहधारिणोः॥अरूपिणोरूपविधारणंपुनर्नृणांमहानु
ग्रहस्वकेवलं॥२३॥पठन्द्विजोवागृषभत्वमीयात्क्षत्रान्वयोभूमिपतित्वमीयात्॥वणिग्जनःपुण्यफलत्व
मीयाच्छृण्वन्हिशूद्रोपिमहत्वमीयात्॥२४॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेअद्भुतोत्तरकांडेआदिका
व्येप्रथमःसर्गः॥१॥ ॥भारद्वाजश्रृणुष्वायरामचंद्रस्यधीमतः॥जन्मनःकारणंविप्रइक्ष्वाकुकुलवारिधौ
॥१॥सीतायाश्चमहादेव्याःपृथिव्यांजन्महेतुकं॥तत्ररामकथामादौवक्ष्यामिमुनिपुंगव ॥२॥श्रूयतांमुनि
शार्दूलअंबरीषकथालयं॥पुरुषोत्तममाहात्म्यंसर्वपापहरंपरं॥३॥त्रिशंकोर्दयिताभार्यासर्वलक्षणशोभि
ता॥अंबरीषस्यजननीनित्यंशौचसमन्विता॥४॥योगनिद्रांसमारूढंशेषपर्यंकशायिनं॥नारायणंमहात्मा
नंब्रह्मांडकमलोद्भवं॥५॥तमसाकालरुद्राख्यंरजसाकनकांडजं॥सत्वेनसर्वगंविष्णुंसर्वदेवनमस्कृतं॥
६॥अर्चयामाससततंवाङ्मनःकायवृत्तिभिः॥माल्यदामादिकंसर्वंस्वयमेवव्यचीकरत्॥७॥गंधादिपेष
णंचैवधूपद्रव्यादिकंतथा ॥तत्सर्वंकौतुकाविष्टास्वयमेवचकारसा॥८॥शुभापद्मावतीनित्यंवचोना

रायणेतिच॥अनंतेतिचसानित्यंभाषमाणायत व्रता॥९॥दशवर्षसहस्राणितत्परेणांतरात्मना॥अर्चयामा
सगोविंदंगंधपुष्पादिभिःशुभैः॥१०॥विष्णुभक्तान्महाभागान्सर्वपापविवर्जितान्॥दानमानार्चनैर्नित्यंध
नैस्तैरतोषयत्॥११॥ततःकदाचित्सादेवीद्वादश्यांसमुपोष्यवै॥हरेरग्रेमहाभागासुष्वापपतिनासह॥१२
तत्रनारायणोदेवस्तामाहपुरुषोत्तमः॥किमिच्छसिवरंभद्रेमत्तःकिंब्रूहिभामिनि॥१३॥सादृष्ट्वातंवरंवव्रेपु
त्रस्त्वद्भक्तिमान्भवेत्॥सार्वभौमोमहातेजाःस्वकर्मनिरतःशुचिः॥१४॥तथेत्युक्त्वाददौतस्यैफलमेकंज
नार्दनः॥साप्रबुद्धाफलंदृष्ट्वाभर्त्रेसर्वंनिवेद्यच॥१५॥भक्षयामाससंदृश्यफलंतद्धृष्टमानसा॥ततःका
लेनसादेवीपुत्रंकुलविवर्द्धनं॥१६॥असूयतशुभाचारंवासुदेवपरायणं॥शुभलक्षणसंपन्नंचक्रांकितम
नुत्तमं॥१७॥जातंदृष्ट्वापितापुत्रंक्रियाःसर्वाश्चकारवै॥अंबरीषइतिख्यातोलोकेसमभवत्प्रभुः॥१८॥पित
र्युपरतेश्रीमानभिषिक्तोमहात्मभिः॥मंत्रिष्वाधायराज्यंचतपउग्रंचकारसः॥१९॥संवत्सरसहस्रंवैजपन्ना
रायणंप्रभुं॥हृत्पुंडरीकमध्यस्थंसूर्यमंडलमध्यगं॥२०॥शंखचक्रगदापद्मंधारयंतंचतुर्भुजं॥शुद्धजांबून
दनिभंब्रह्मविष्णुशिवात्मकं॥२१॥सर्वाभरणसंयुक्तंपीतांबरधरंप्रभुं॥श्रीवत्सवक्षसंदेवंपुरुषंपुरुषोत्तमम्

अ॰ ॥२२॥ ततोगरुडमारुह्यसर्वदेवैरभिष्टुतः॥आजगामसविश्वात्मासर्वलोकनमस्कृतः॥२३॥ऐरावतमिवाचिं
दु॰ त्यंकृत्वावैगरुडंहरिः॥स्वयंशक्रइवासीनस्तमाहनृपसत्तमं॥२४॥इंद्रोहमस्मिभद्रंतेकिंददामितवाद्यवै॥
३ सर्वलोकेश्वरोहंत्वांरक्षितुंसमुपागतः॥२५॥अंबरीषस्तुतंदृष्ट्वाशक्रमैरावतस्थितं॥उवाचवचनंधीमान्
विष्णुभक्तिपरायणः॥२६॥नाहंत्वामभिसंधायतपआस्थितवानिह॥त्वयादत्तंचनेच्छामिगच्छशक्रयथा
सुखं॥२७॥ममनारायणोनाथस्त्वांनस्तोष्येमराधिप॥व्रजेंद्रमाकृथास्त्वत्रममाश्रमविलोपनं॥२८॥ततःप्रह
स्यभगवान्स्वरूपमकरोद्धरिः॥शार्ङ्गचक्रगदापाणिःशंखहस्तोजनार्दनः॥२९॥गरुडोपरिविश्वात्मानीलाच
लइवापरः॥देवगंधर्वसंघैश्चस्तूयमानःसमंततः॥३०॥प्रणम्यराजासंतुष्टस्तुष्टावगरुडध्वजं॥प्रसीदलोक
नाथस्त्वंममनाथजनार्दन॥३१॥कृष्णकृष्णजगन्नाथसर्वलोकनमस्कृत॥त्वमादिस्त्वमनादिस्त्वमनंतः
पुरुषःप्रभुः॥३२॥अप्रमेयोविभुर्विष्णुर्गोविंदःकमलेक्षणः॥महेश्वरांशजोमध्यःपुष्करःखगमःखगः॥३३
॥कव्यवाहःकपालीत्वंहव्यवाहःप्रभंजनः॥आदिदेवःक्रियानंदःपरमात्मनिसंस्थितः॥३४॥त्वांप्रपन्नोस्मि रा॰
गोविंदपाहिमांपुष्करेक्षण॥नान्यागतिस्त्वदन्यामेत्वामेवशरणंगतः॥३५॥तमाहभगवान्विष्णुःकिंते ३

हृदि चिकीर्षितं ॥ तत्सर्वं संप्रदास्यामि भक्तोऽसि मम सुव्रत ॥ ३६ ॥ भक्तप्रियोऽस्मि सततं तस्माद्दातुमिहागतः ॥ ॥ अंबरीषस्तु तच्छ्रुत्वा हर्षगद्गदया गिरा ॥ ३७ ॥ प्रोवाच परमात्मानं नारायणमनामयं ॥ त्वयि विष्णौ परानंदे नित्यमेव वर्ततां मतिः ॥ भवेयं त्वत्परो नित्यं वाङ्मनःकायकर्मभिः ॥ पालयिष्यामि पृथिवीं कृत्वा वै वैष्णवं जगत् ॥ ३९ ॥ यज्ञहोमार्चनैश्चैव तर्पयिष्यामि सुरोत्तमान् ॥ वैष्णवान्पालयिष्यामि हनिष्यामि च शात्रवान् ॥ ४० ॥ एवमुक्तस्तु भगवान्प्रत्युवाच नृपोत्तमं ॥ एवमस्तु तवेच्छा वै चक्रमेतत्सुदर्शनं ॥ ४१ ॥ पुरा रुद्रप्रभावेन लब्धं वै दुर्लभं मया ॥ ऋषिशापादिकं दुःखं शत्रुरोगादिकं तथा ॥ ४२ ॥ निहनिष्यति ते दुःखमित्युक्त्वांतरधीयत ॥ ततः प्रणम्य मुदितो राजा नारायणं प्रभुं ॥ ४३ ॥ प्रविश्य नगरीं दिव्यामयोध्यां पर्यपालयत् ॥ ब्राह्मणादींस्तथा वर्णान्स्वे स्वे कर्मण्ययोजयत् ॥ ४४ ॥ नारायणपरो नित्यं विष्णुभक्ताननकल्मषान् ॥ पालयामास हृष्टात्मा विशेषेण जनाधिपः ॥ ४५ ॥ अश्वमेधशतैरिष्ट्वा वाजपेयशतानि च ॥ पालयामास पृथिवीं सागरावरणामिमां ॥ ४६ ॥ गृहे गृहे हरिस्तस्थौ वेदघोषो गृहे गृहे ॥ नामघोषो हरेश्चैव यज्ञघोषस्तथैव च ॥ ४७ ॥ अभवन्नृपशार्दूले तस्मिन्राज्यं प्रशासति ॥ नासस्या नातृणा भूमिर्न दुर्भिक्षादिभिर्युता ॥ ४८ ॥ रोगहीनाः प्रजा नित्यं सर्वोपद्रववर्जि-

ता॥ अंबरीषोमहातेजाः पालयामास मेदिनीं॥४९॥ सर्वैमहात्मासततंचरक्षितः सुदर्शनेनातिसुदर्शनेन॥ प्रभु
भां समुद्रावधिसंततां महीं सुपालयामासमहीमहेंद्रः॥५०॥ ॥इत्यार्षेश्रीरामायणेवाल्मीकीये अद्भुतोत्तरकांडे
अंबरीषवरप्रदानोनामद्वितीयः सर्गः॥२॥ ॥तस्यैवंवर्तमानस्य कन्याकमललोचना॥ श्रीमती नामविख्या
तासर्वलक्षणशोभिता॥१॥ तस्मिन्कालेमुनिः श्रीमान्नारदोभ्यागतोगृहं॥ अंबरीषस्यराज्ञोवै पर्वतश्चम
हाद्युतिः॥२॥ तावुभावागतौदृष्ट्वाप्रणिपत्ययथाविधि॥ अंबरीषोमहातेजाः पूजयामासतौनृपः॥३॥ क
न्यांतुप्रेक्ष्यभगवान्नारदः प्राहविस्मितः॥ केयंराजन्महाभागा कन्यासुरसुतोपमा॥४॥ ब्रूहिधर्मभृतांश्रेष्ठ
सर्वलक्षणशोभिता॥ निशम्यवचनंतस्यराजाप्राहकृतांजलिः॥५॥ दुहितेयंममविभो श्रीमतीनामनामतः॥
प्रदानसमयंप्राप्तावरमन्वेषतीशुभा॥६॥ इत्युक्तोमुनिशार्दूलस्तामैच्छन्नारदोद्विजः॥ पर्वतोपिमुनिस्तांवै
चकमेसर्षिसत्तमः॥७॥ अनुज्ञाप्यचराजानंनारदोवाक्यमब्रवीत्॥ रहस्याहूयधर्मात्मा ममदेहिसुतामि
मां॥८॥ पर्वतोपितथाप्राहराजानंरहसिप्रभुः॥ तावुभौप्राहधर्मात्माप्रणिपत्यभयार्दितः॥९॥ उभौभवंतौ
कन्यांमेप्रार्थयानौकथंत्वहं॥ करिष्यामिमहाप्राज्ञौ शृणुनारदमेवचः॥१०॥ त्वंचपर्वतमेवाक्यंशृणुतंवस्या

मियस्त्रभो।।कन्येयंसुवयोरेकंवरयिष्यतिचेच्छुभा।।११।।तस्मैकन्यांप्रयच्छामिनान्यथाशक्तिरस्तिमे।।तथे
त्युक्त्वातुतौविप्रौश्वआयास्यावएवहि।।१२।।इत्युक्त्वामुनिशार्दूलौजग्मतुःप्रीतमानसौ।।वासुदेवपरौनित्य
मुभौज्ञानवतांवरौ।।१३।।विष्णुलोकंततोगत्वानारदोमुनिसत्तमः।।प्रणिपत्यहृषीकेशंवाक्यमेतदुवाच
ह।।१४।।वृत्तांतंसर्वमाख्यायनाथनारायणाव्यय।।रहसित्वांप्रवक्ष्यामिनमस्तेभुवनेश्वर।।१५।।ततःप्रह
स्यगोविंदःसर्वात्माकर्मठंमुनिं।।ब्रूहीत्याहसविश्वात्मामुनिराहचकेशवं।।१६।।त्वदीयोनृपतिःश्रीमानंब
रीषोमहामतिः।।तस्यकन्याविशालाक्षीश्रीमतीनामनामतः।।१७।।परिणेतुमहंतांवैइच्छामिवचनंशृणु
।।पर्वतोयंमुनिःश्रीमांस्तवभृत्यस्तपोनिधिः।।१८।।तामैच्छत्सोपिभगवंस्तमाहचजनाधिपः।।अंबरी
षोमहातेजाःकन्यायंसुवयोर्वरं।।१९।।लावण्ययुक्तंदृगुणाद्यदितस्मैददाम्यहं।।इत्याहावांनृपस्तत्रतथे
त्युक्त्वाप्यहंततः।।२०।।आगमिष्यामितेराजन्श्वःप्रभातेगृहंप्रति।।आगतोहंजगन्नाथकर्तुमर्हसिमेप्रियं
।।२१।।वानराननवद्भातिपर्वतस्यमुखंयथा।।तथाकुरुजगन्नाथममचेदिच्छसिप्रियं।।२२।।श्रीमतीतुतथा
पश्येन्नान्यःपश्येत्तथाविधं।।तथेत्युक्त्वासगोविंदःप्रहस्यमधुसूदनः।।२३।।त्वयोक्तंतत्करिष्यामिगच्छ।

अ० सौम्ययथासुखं॥एवमुक्तोमुनिर्हृष्टःप्रणिपत्यजनार्दनं॥२४॥मन्यमानःकृतात्मानमयोध्यांवैजगामसः॥ग
दु० तेमुनिवरेतस्मिन्पर्वतोपिमहामुनिः॥२५॥प्रणम्यमाधवंहृष्टोरहस्येनमुवाचह॥वृत्तांतंचनिवेद्याग्रेनारद
५ स्यजगत्पते॥२६॥गोलांगूलमुखंयद्वन्मुखंभातितथाकुरु॥श्रीमतीतुतथापश्येन्नान्यःपश्येत्तथाविधं॥२७
॥तच्छ्रुत्वाभगवान्विष्णुस्त्वयोक्तंचकरोमिवै॥गच्छशीघ्रमयोध्यांत्वंमावादीर्नारदस्यवै॥२८॥त्वयामेमं
त्रितंपर्वतथेत्युक्त्वाजगामसः॥ततोराजासमाज्ञायप्राप्तौमुनिवरौतदा॥२९॥मंगलैर्विविधैर्भद्रै¹रयो
ध्यांध्वजमालिनीं॥मंडयामासलाजैश्चपुष्पैश्चैवसमंततः॥३०॥अभिषिक्तगृहद्वारांसिक्तांगणमहा
पथां॥दिव्यगंधरसोपेतांधूपितांदिव्यधूपकैः॥३१॥कृत्वाचनगरींराजामंडयामासतांसभां॥दिव्यगंधै
स्तथाधूपैरत्नैश्चविविधैस्तथा॥३२॥अलंकृतांमणिस्तंभैर्नानामाल्योपशोभितैः॥परार्ध्यास्तरणोपेतै
र्दिव्यभद्रासनैर्वृतां॥३३॥नानाजनसमावेशेनरेंद्रैरभिसंवृतां॥कृत्वानृपेंद्रस्तांकन्यामानायप्रविवेश
ह॥३४॥सर्वाभरणसंपन्नाश्रीरिवायतलोचना॥करसंमितमध्यांगीपंचस्निग्धाशुभानना॥स्त्रीभिःप रा०
रिवृतादिव्याश्रीमतिसंस्थितासती॥३५॥सभातुसाभूमिपतेःसमृद्धामणिप्रवेकोत्तमरत्नचित्रा॥न्यस्तास ५

१ सर्वतोभद्रैः

नामाल्यवतीसुगंधात्तमन्वयुस्तेसुरराजवर्याः॥३६॥अथाययौब्रह्मवरात्मजोमहांस्त्रैविद्यवृद्धोभगवान्म
हात्मा॥सपर्वतोब्रह्मविदांवरिष्ठोमहामुनिर्नारद आजगाम॥३७॥ ॥इत्यार्षेश्रीम॰ वाल्मी॰ आदिकाव्ये
अद्भुतोत्तरकांडे नारदपर्वतसभाप्रवेशोनामतृतीयःसर्गः॥३॥ ॥तावागतौसमीक्ष्याथराजासंभ्रांतमा
नसः॥दिव्यमासनमादिश्यपूजयामासतावुभौ॥१॥उभौदेवर्षीदिव्यौनित्यज्ञानवतांवरौ॥समासीनौ
महात्मानौकन्यार्थेमुनिसत्तमौ॥२॥तावुभौप्रणिपत्याग्रेकन्यांतांश्रीमतींशुभां॥स्थितांकमलपत्राक्षींप्रा
हराजायशस्विनीं॥३॥अनयोर्यंवरंभद्रेमनसात्वमिहेच्छसि॥तस्मैमालामिमांदेहिप्रणिपत्ययथाविधि
॥४॥एवमुक्तातुसाकन्यास्त्रीभिःपरिवृतातदा॥मालांहिरण्मयींदिव्यामादायशुभलोचना॥५॥तस्थौता
माहराजासौवत्सेकिंत्वंकरिष्यसि॥६॥अनयोरेकमुद्दिश्यदेहिमालामिमांशुभे॥साप्राहपितरंत्रस्ताइमौ
तुवानराननौ॥७॥मुनिश्रेष्ठौनपश्यामिनारदंपर्वतंतथा॥अनयोर्मध्यतस्त्वेकंवरंषोडशवार्षिकं॥८॥स
र्वाभरणसंयुक्तमतसीपुष्पसन्निभं॥दीर्घबाहुंविशालाक्षंतुंगोरःस्थलमुत्तमं॥९॥चामीकरंधंकरणपट
युग्मकशोभितं॥विभक्तत्रिवलीयुक्तनाभिंव्यक्तकृशोदरं॥१०॥हिरण्याभरणोपेतंसुरंगकनखंशुभं॥पद्मा

कारकांत्वेनपद्मास्यंपद्मलोचनं॥११॥पद्मांघ्रिंपद्महृदयंपद्मनाभिंश्रियावृतं॥दंतपंक्तिभिरत्यर्थंकुंद
कुड्मलसन्निभं॥१२॥हसंतंमांसमालोक्यदक्षिणंचप्रसार्यवै॥पाणिंस्थितमिमंछन्नंपश्यामिशुभमूर्ध
जं॥१३॥एवमुक्तेमुनिः प्राहनारदःसंशयंगतः॥किंयतोबाहवस्तस्यकन्येवदयथातथं॥१४॥बाहुद्वयंच
पश्यामीत्याहकन्यासुविस्मिता॥प्राहतांपर्वतस्तत्रतस्यवक्षस्थलेशुभे॥१५॥किंचपश्यसिमेब्रूहिकरे
किंधारयत्यपि॥कन्यातमाहमालांवैचंचद्रूपामनुत्तमां॥१६॥वक्षस्थलेस्यपश्यामिकरेकार्मुकसाय
कौ॥एवमुक्तौमुनिश्रेष्ठौपरस्परमनुत्तमौ॥१७॥मनसाचिंतयंतौतौमायेयंकस्यचिद्भवेत्॥मायावीतस्क
रोनूनंस्वयमेवजनार्दनः॥१८॥आगतोनान्यथाकुर्यात्कथंमेऽन्योमुखंत्विदं॥गोलांगूलीयमित्येवंचिं
तयामासनारदः॥१९॥पर्वतोपितथैवैतद्वानरत्वंकथंमम॥प्राप्तमित्येवसहसाचिंतामापेद्विवांस्तथा॥
२०॥ततोराजाप्रणम्यासौनारदंपर्वतंतथा॥भवद्भ्यांकिमिदंभद्रौकृतंबुद्धिविमोहनं॥२१॥स्वस्थौभवंतौ
तिष्ठेतांयदिकन्यार्थमुद्यतौ॥एवमुक्तौमुनिश्रेष्ठौनृपमूचतुरुल्बणौ॥२२॥त्वमेवमोहंकुरुषेनावामि
हकश्चन॥आवयोरेकमेषातेवरयत्वेवभामिनी॥२३॥ततःसाकन्यकाभूयःप्रणिपत्यचदेवताम्॥

पित्रा निर्मुक्ता सहसा मुनिशापभयाद्द्विज ॥२४॥ मालामादाय तिष्ठंती तयोर्मध्ये समाहिता ॥ पूर्ववत्पुरुषं दृष्ट्वा माल्यं तस्मै ददौ हि सा ॥२५॥ अनंतरं च सा कन्या दृष्टा न मनुजैः पुरः ॥ ततो नादः समभवत्किमेतदिति विस्मयात् ॥२६ तामादाय गतो विष्णुः स्वस्थानं पुरुषोत्तमः ॥ पुराणतदर्थमनिशं तपस्तप्त्वा वरांगना ॥२७॥ श्रीमतीयं समुत्पन्ना सा गता च तथा हरिं ॥ तावुभौ मुनिशार्दूलौ धिक्कृत्वामित्येव दुःखितौ ॥२८॥ वासुदेवं प्रतितदा जग्मतुर्भवनं हरेः ॥ तावागतौ समीक्ष्याह श्रीमतीं भगवान्हरिः ॥२९॥ मुनिश्रेष्ठौ समायातौ गृहस्वात्मानमत्र वै ॥ तथेत्युक्त्वा च सा देवी प्रहसंती चकार ह ॥३०॥ नारदः प्रणिपत्याग्रे प्राह दामोदरं हरिं ॥ किमिदं कृतवानघ मम त्वं पर्वतस्य च ॥३१॥ त्वमेव नूनं गोविंद कान्यां तां हृतवानसि ॥ तच्छ्रुत्वा पुरुषो विष्णुः पिधाय श्रोत्रमच्युतः ॥३२॥ पाणिभ्यां प्राह भगवान्भवता किमुदीरितं ॥ कामवादो न भावो मे मुनिवृत्ते रहो किल ॥३३ एवमुक्तो मुनिः प्राह वासुदेवं स नारदः ॥ कर्णमूले मम कथं गोलांगूलमुखं त्विति ॥३४॥ तदाकर्ण्य महाबुद्धिर्देवो नारायणो हरिः ॥ कर्णमूले तमाहेदं वानरास्यं कृतं मया ॥३५॥ पर्वतस्य तथा विप्र गोलांगूलमुखं तव ॥ यथा भवांस्तथा सो पि प्रार्थयामास निर्जने ॥३६॥ मामेवं भक्तिवशगस्तथास्म्यकरवं मुने ॥ न स्वेच्छया कृतं

तद्धांप्रियार्थंनान्यथात्विति ॥ ३७ ॥ याचतेयत्त्वयश्चैवतच्चतस्यददाम्यहं ॥ नदोषोऽत्रगुणोवापियुवयोर्ममवा
द्विज ॥ ३८ ॥ पर्वतोपितथाप्राहतस्याप्येवंजगादसः ॥ शृण्वतोरुभयोस्तत्रप्राहदामोदरोवचः ॥ ३९ ॥ प्रियंभ
वतोः कृतवान्सत्येनायुधमालभे ॥ नारदः प्राहधर्मात्माआवयोर्मध्यतःस्थितः ॥ ४० ॥ धनुष्मान्द्विभुजः कोनु
तांहृत्वागतवान्किल ॥ तच्छ्रुत्वावासुदेवोसौप्राहतौमुनिसत्तमौ ॥ ४१ ॥ मायाविनोमहात्मानोबहवःसंति
सत्तमौ ॥ तत्रसाश्रीमतीदेवीहृताकेनापिसुव्रतौ ॥ ४२ ॥ चक्रपाणिरहंनित्यंचतुर्बाहुरितिस्थितिः ॥ तस्मा
न्नाहंतथ्यंवैभवद्भ्यांविदितंहितत् ॥ ४३ ॥ इत्युक्तौप्रणिपत्यैनमूचतुःप्रीतमानसौ ॥ कोत्रदोषस्तववि
भोनारायणजगत्पते ॥ ४४ ॥ दौरात्म्यंतुनृपस्यैवमायांहिकृतवानसौ ॥ इत्युक्त्वाजग्मतुस्तस्मान्मुनीनारदप
र्वतौ ॥ ४५ ॥ अंबरीषंसमासाद्यशापेनैनमयोजयत् ॥ नारदःपर्वतश्चैवयस्मादावामिहागतौ ॥ ४६ ॥ आहूय
पश्चादन्यस्मैकन्यांत्वंदत्तवानसि ॥ मायायोगेनतस्मात्त्वांतमो[2]ऽज्ञाभिभविष्यति ॥ ४७ ॥ तेननात्मानमत्यर्थंये
यावत्त्वंहिवेत्स्यसि ॥ एवंशापेप्रवृत्तेतुतमोराशिरथोत्थितः ॥ ४८ ॥ नृपंप्रतिततस्तच्चक्रंविष्णोःप्रादुरभूत्क्षणात्
॥ चक्रवित्रासितंघोरंतावुभावभ्यगात्तमः ॥ ४९ ॥ ततःसंत्रस्तसर्वांगौधावमानौमहामुनी ॥ पृष्ठतश्चैवकमा ।

१ अत्रद्विवचनंतानित्रीणिसंबोधनानि २ तमःअज्ञेतिछेदः ॥

लोक्यतमोराशिंचदुर्भेदं॥५०॥कन्यासिद्धिरहोप्राप्तास्त्वयावयोरितिवेगितो॥ लोकालोकांतमनिशंधाव
मानैस्तमोऽर्दितो॥५१॥त्राहित्राहीतिगोविंदंभाषमाणोभयार्दितो॥विष्णुलोकंततोगत्वानारायणजग
त्पते॥५२॥वासुदेवहृषीकेशपद्मनाभजनार्दन॥त्राह्यावांपुंडरीकाक्षनाथोसिपुरुषोत्तम ॥५३॥ इत्यूच
तुर्वासुदेवंमुनीनारदपर्वतौ॥ततोनारायणोऽचिंत्यःश्रीमान्श्रीवत्सलांछनः॥५४॥निवार्यचक्रंध्वांतंच
भक्तानुग्रहकाम्यया॥अंबरीषश्चमद्भक्तस्तथेमौमुनिसत्तमौ॥५५॥अनयोर्नृपस्यचतथाहितंकार्यमयापुनः
॥आहूयतौततःश्रीमान्गिरःप्रल्हादयन्हरिः॥५६॥उवाचभगवान्विष्णुःश्रूयतामितिमेवचः॥क्षमे
तांमुनिशार्दूलौभक्तसंरक्षणायमे॥५७॥अपराद्धंचचक्रेणक्षमाप्रीताहिसाधवः॥ततस्तौमुनिशार्दूलौमायां
तस्यावबुध्यच॥५८॥ददतुश्चततःशापंविष्णुमुद्दिश्यकोपनौ॥श्रीमतीहरणंविष्णोयत्कृतंछद्मनात्व
या॥५९॥यथामूर्त्यातथैवत्वंजायेथामधुसूदन॥अंबरीषस्यान्ववायेराज्ञोदशरथस्यहि॥६०॥पुत्रस्त्वंभवि
तापुत्रीश्रीमतीधरणीप्रजा॥भविष्यतिविदेहस्यप्राप्यतांपालयिष्यति॥६१॥राक्षसापसदःकश्चित्तांते ।
भार्यांहरिष्यति॥यतोराक्षसधर्मेणहृताचश्रीमतीशुभा॥६२॥अतस्तेराक्षसाभार्याहर्तव्याछद्मनाच्युत॥ य

१इतिविचार्येतिशेषः१

थाप्राप्तंमहद्दुःखमावाभ्यांश्रीमतीहृते॥६३॥हाहेतिरुदतालभ्यंतथादुःखंचतत्कृते॥इत्युक्तवंतौतौ
विप्रौप्रोवाचमधुसूदनः॥६४॥अंबरीषस्यान्ववायेभविष्यतिमहायशाः॥श्रीमान्ध्रुवस्थोनामभूमिपा
लोतिधार्मिकः॥६५॥तस्याहमग्रजःपुत्रोरामोनामभवाम्यहं॥तत्रमेदक्षिणोबाहुर्भरतोभविताकिल॥
६६॥शत्रुघ्नोवामबाहुश्चशेषोसौलक्ष्मणःस्वयं॥ऋषिशापेनचैवस्यादन्यथाचेक्रगम्यतां॥६७॥ऋषि
शापतमोराशेयदारामोभवाम्यहं॥तत्रमांसमुपागच्छगच्छेदानींनृपंविना॥६८॥त्यक्त्वापिचमुनिश्रेष्ठावि
तिस्मप्राहमाधवः॥एवमुक्तेतमोनाशंतत्क्षणाच्चजगामवै॥६९॥आत्मार्थंसंचितंतेनप्रभुणाभक्तरक्षि
णा॥निवारितंहरेश्चक्रंयथापूर्वमतिष्ठत॥७०॥मुनिश्रेष्ठौभयान्मुक्तौप्रणिपत्यजनार्दनं॥निर्गतौशोकसंत
प्तावूचतुस्तौपरस्परं॥७१॥अद्यप्रभृतिदेहांतमावांकन्यापरिग्रहं॥नकरिष्यावइत्युक्त्वाप्रतिज्ञायचतावृ
षी॥७२॥मौनध्यानपरौशुद्धौयथापूर्वंव्यवस्थितौ॥अंबरीषोपिराजासौपरिपाल्यचमेदिनीं॥७३॥सभृत्य
ज्ञातिसंबंधोविष्णुलोकंजगामवै॥मानार्थमंबरीषस्यतथैवमुनिसिंहयोः॥७४॥रामोदाशरथिर्भूत्वातम
सालुप्तबुद्धिकः॥कदाचित्कार्यवशतःस्मृतिःस्यादात्मनःप्रभोः॥७५॥पूर्णार्थोपिमहाबाहुरपूर्णार्थइवप्रभुः

॥अनुग्रहायभक्तानांप्रभुणामीदृशीगतिः॥७६॥मायांकृत्वामहेशस्यप्रोत्थितामानुषीतनुः॥तस्मान्माया
नकर्तव्याविद्वद्भिर्दोषदर्शिभिः॥७७॥एततेकथितंसर्वंरामजन्मकथाश्रयं॥अंबरीषस्यमाहात्म्यं
मायावित्त्वंचवैहरेः॥७८॥यःपठेच्छृणुयाद्वापिमायावित्त्वंहरेर्विभोः॥मायांविसृज्यपुण्यात्मावि
ष्णुलोकंसगच्छति॥७९॥दशरथसुतंजन्मकारणंयःपठतिशृणोत्यनुमोदतेद्विजेंद्रः॥व्रजतिसभ
गवद्गृहातिथित्वंनहिशमनस्यभयंकुतश्चिदस्य॥८०॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआ
दिकाव्येअद्भुतोत्तरकांडेश्रीरामजन्मोपक्रमश्चतुर्थःसर्गः॥४॥ ॥भरद्वाजशृणुष्वाथसीताजन्म
निकारणं॥पुरात्रेतायुगेकश्चित्कौशिकोनामवैद्विजः॥१॥वासुदेवपरोनित्यंनामगानरतःसदा॥४
भोजनासनशय्यासुसदातद्गतमानसः॥उदारचरितंविष्णोर्गीयमानःपुनःपुनः॥२॥विष्णुस्थलंस
मासाद्यहरेःक्षेत्रमनुत्तमं॥अगायतहरिंतत्रतालवल्लुलपान्वितं॥३॥मूर्छनामूर्छयोगेनश्रुतिमंड
लवेदितं॥भक्तियोगसमापन्नोभिक्षामश्नातितत्रवै॥४॥तत्रैनंगायमानंचदृष्ट्वाकश्चिद्द्विजस्तदा॥प
द्माक्षइतिविख्यातस्तस्मैचान्नंददौसदा॥५॥सकुटुंबोमहातेजाअश्नन्नन्नंचतस्यवै॥कौशिकोहितदा

अ०
मु०
९

हृष्टोगायन्नास्तेहरिंप्रभुं॥६॥शृण्वन्नास्तेसपद्माक्षःकालेकालेचभक्तितः॥कालयोगेनसंप्राप्ताःशिष्यावैकौ
शिकस्यच॥७॥सप्तराजन्यवैश्यानांविप्राणांकुलसंभवाः॥ज्ञानविद्याधिकाःशुद्धावासुदेवपरायणाः॥८
तेषामपितथान्नाद्यंपद्माक्षःप्रददौस्वयं॥शिष्यैस्तुसहितोनित्यंकौशिकोहृष्टमानसः॥९॥विष्णुस्थलेहरिं
तत्रआस्तेगायन्यथाविधि॥तत्रैवमालवोनामवैश्योविष्णुपरायणः॥१०॥दीपमालांहरेर्नित्यंकरोतिप्रीत
मानसः॥मालतीनामभार्यासीत्तस्यनित्यंपतिव्रता॥११॥गोमयेनसमालिप्यहरेःक्षेत्रंसमंततः॥भार्यासहा
स्तेसंप्रीताशृण्वतीगानमुत्तमं॥१२॥कुशस्थलीसमुत्पन्नाब्राह्मणाःसंशितव्रताः॥पंचाशद्वैसमापन्नाहरे
र्गानार्थमुत्तमाः॥१३॥साधयंतोहिकार्याणिकौशिकस्यमहात्मनः॥गानविद्यार्थतत्त्वज्ञाःशृण्वंतोह्यवसं
स्तुते॥१४॥ख्यातमासीत्तदातस्यगानंवैकौशिकस्यच॥श्रुत्वाराजासमभ्येत्यकालिंगोवाक्यमब्रवीत्॥१५
॥कौशिकाद्यगणैःसार्द्धंगायस्वेहचमांपुनः॥शृणुध्वंचतथाभूपंकुशस्थलजनाअपि॥१६॥तच्छ्रुत्वाकौ
शिकःप्राहराजानंसांत्वयन्गिरा॥नजिव्हाग्रेमहाराजवाणीचममसर्वदा॥१७॥हरेरन्यमपींद्रंवास्तौति
नापिनवक्तिच॥एवमुक्तेचतच्छिष्यावसिष्ठोगौतमोऽरुणिः॥१८॥सारस्वतस्तथावैश्यश्चित्रमालस्तथाशिशुः

रा०
९

॥ऊचुस्तं पार्थिवं तत्वं यथा प्राह स कौशिकः॥१९॥ श्रीकराश्च तथा प्रोचुः पार्थिवं विष्णुतत्पराः॥ श्रोत्राणी मा
निश्शृण्वंति हरेरन्यं न पार्थिव॥२०॥ मा ते कीर्तिं वयं तस्मात् शृणुमो नैव वा स्तुतिं॥ तच्छ्रुत्वा पार्थिवो रुष्टो गीय
तामिति चाब्रवीत्॥२१॥ स्वभृत्यान्ब्राह्मणा ह्येते कीर्तिं शृण्वंति वै यथा॥ न शृण्वंति कथं तस्माद्धीयमानां स
मंततः॥२२॥ एवमुक्तास्ततो भृत्या जग्गुः पार्थिवसत्तमं॥ निरुद्धकर्णा विप्रास्ते गाने वृत्ते सुदुःखिताः॥२३॥
काष्ठशंकुभिरन्योन्यश्रोत्राणि विभिदुः किल॥ कौशिकाद्यास्तु तां ज्ञात्वा मनोवृत्तिं नृपस्य वै॥२४॥ निर्बंधं कु
रुते कस्मात्त्वगाने सौ नृपः स्थिरं॥ इत्युक्त्वा ते सुनियता जिह्वाग्रं चिच्छिदुः स्वकं॥२५॥ ततो राजा सुसंक्रुद्धः
स्वदेशात्तान्व्यवासयत्॥ आदाय वित्तं सर्वेषां ततस्ते जग्मुरुत्तरां॥२६॥ दिशमासाद्य कालेन कालधर्मेण
योजिताः॥ तानागतान्यमो दृष्ट्वा किं कर्त्तव्यमिति स्म ह॥२७॥ विस्मितस्तत्क्षणे विप्र ब्रह्मा प्राह सुराधिपान्॥
कौशिकादीन्द्विजानद्य वासुदेवपरायणान्॥२८॥ गानयोगेन ये नित्यं पूजयंति जनार्दनं॥ तानानयत भ
द्रं वो यदि देवत्वमिच्छथ॥२९॥ इत्युक्त्वा लोकपालास्ते कौशिकेति पुनः पुनः॥ मालतीति तथा के चित्पद्माक्षे
ति तथापरे॥३०॥ क्रोशमानाः समभ्येत्य तानादाय विहायसा॥ ब्रह्मलोकं गताः शीघ्रं मुहूर्त्तार्द्धेन वै सुराः॥३१॥

अ० कौशिकादींस्तथादृष्ट्वाब्रह्मालोकपितामहः॥अभ्यागम्ययथान्यायंस्वागते नाभ्यपूजयत्॥३२॥ततःकोलाह
हु० लश्चाभूदतिगौरवसुल्बणं॥ब्रह्मणाचकृतंदृष्ट्वादेवानांद्विजसत्तम॥३३॥हिरण्यगर्भोभगवांस्तान्निवार्य
१० सुरोत्तमान्॥कौशिकादींस्तदादायमुनिदेवैःसमावृतः॥३४॥विष्णुलोकंययौशीघ्रंवासुदेवपरायणः॥त
त्रनारायणोदेवःश्वेतद्वीपनिवासिभिः॥३५॥ज्ञानयोगेश्वरैःसिद्धैर्विष्णुभक्तिपरायणैः॥नारायणसमैर्दि
व्यैश्चतुर्बाहुधरैःशुभैः॥३६॥विष्णुचिन्हसमापन्नैर्दीप्यमानैरकल्मषैः॥अष्टाशीतिसहस्रैस्तुसेव्यमानो
मनोजवैः॥३७॥अस्माभिर्नारदाद्यैश्चसनकाद्यैरकल्मषैः॥भूतैर्नानाविधैश्चैवदिव्यस्त्रीभिःसमंततः॥३८
॥सेव्यमानोऽथमध्येवैसहस्रद्वारसंवृते॥सहस्रयोजनायामेदिव्येमणिमयेशुभे॥३९॥विमानेविमलेचित्रे
भद्रपीठासनेहरिः॥लोककार्यमसक्तानांदत्वादृष्टिंसमास्थितः॥४०॥तस्मिन्कालेऽथभगवान्कौशिका
द्यैश्चसंवृतः॥आगम्यप्रणिपत्याग्रेतुष्टावगरुडध्वजं॥४१॥ततोऽवलोक्यभगवान्हरिर्नारायणःप्रभुः॥कौ
शिकेत्याहसंप्रीत्यातान्सर्वांश्चयथाक्रमं॥४२॥जयघोषोमहानासीन्महाश्चर्येसमागते॥ब्रह्माणमाहवि ए०
श्वात्माशृणुब्रह्मन्यथोदितं॥४३॥कौशिकस्यचयेविप्राःसाध्यसाधनतत्पराः॥हितापसंप्रवृत्तावैकुशस्य १०
॥ कार्येदूतिशेषः १

लनिवासिनः॥४४॥मत्कीर्तिश्रवणेसुक्तागानतत्त्वार्थकोविदाः॥अनन्यदेवताभक्ताःसाध्यादेवाभवंतिमे॥ः
४५॥मत्समीपेतथाह्यस्य[1]प्रवेशंदेहिसर्वदा॥एवमुक्त्वापुनर्देवःकौशिकंप्राहमाधवः॥४६॥स्वशिष्यैस्त्वंमहा
प्राज्ञदिव्यलोनामवैसदा॥गणाधिपत्वमापन्नोयत्राहंतत्समास्ववै॥४७॥मालेती[2]मालवंचेतिप्राहदामोदरो
वचः॥ममलोकेयथाकामंभार्ययासहमालव॥४८॥दिव्यरूपधरःश्रीमान्शृण्वन्गानमिहानुगैः॥आस्व
निसंयथाकामंयावल्लोकाभवंतिवै॥४९॥पद्माक्षस्माद्भगवान्धनदोभवमानद॥धनानामीश्वरोभूत्वाविह
रस्वयथासुखं॥५०॥ब्रह्माणंचततःप्राहकौशिकोभूद्गणाधिपः॥गणास्तोष्यंतितंचास्तुप्राप्तोमेऽस्तिसलोक
तां॥५१॥एतेचविप्रानियतंममभक्तायशस्विनः॥श्रोत्रच्छिद्रंयथाहस्तशंकुभिर्वैपरस्परं॥५२॥श्रोष्यामोनैव
चान्यद्वैहरेःकीर्तिंविनेतिये॥महाव्रतधराविप्राममभक्तिपरायणाः॥५३॥एतेप्राप्तास्तुदेवत्वंममसान्निध्यमेव
च॥मालवोभार्ययासार्द्धंमत्सेवत्वंपरिगृह्यवै॥५४॥गानमानादिभिर्नित्यमभ्यर्च्यसततंहिमां॥गानंशृणोतितिनि
यतोमत्कीर्तिचरितान्वितं॥५५॥तेनासौप्राप्तवान्लोकंममब्रह्मन्सनातनं॥पद्माक्षोसौमहाभागःकौशिक
स्यमहात्मनः॥५६॥धनेशत्वमवाप्तोसौममसान्निध्यमेवच॥एवमुक्त्वाहरिस्तत्रसमास्तेलोकपूजितः॥५७॥

१ कौशिकस्य २ मालतीसहितंमालवं

ततोहरिर्भक्तजनैःसमाहूतःसुखेनतस्थौकनकासनेशुभे॥भक्तैकगम्योनिजभक्तलोकान्स्लालयन्पाणिस
रोरुहेण॥५८॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेकौशिकादिवैकुंठगमनंना
मपंचमःसर्गः॥५॥ ॥तस्मिन्क्षणेसमारब्धोमधुराक्षरपेशलैः॥महामहोत्सवस्तत्रकौशिकप्रीतयेऽद्भुतः
॥१॥विपंचीगुणतत्त्वज्ञैर्वाद्यविद्याविशारदैः॥ततस्तत्प्रवणायालंचेटीकोटिसमावृता॥२॥गायमानासमा
यातालक्ष्मीर्विष्णुपरिग्रहः॥वृतासहस्रकोटीभिर्वैत्रपाणिभिराशुगैः॥३॥ब्रह्मादिसुरसंघानांघनंदृष्ट्वास
मागमं॥चेटीगणाधिपारुष्टाभुशुंडीपरिघान्विताः॥४॥ब्रह्मादींस्तर्जयंत्यस्तान्मुनींश्चापिसमंततः॥उत्सा
र्यदूरंसंहृष्टाविष्ठिताःपर्वतोपमाः॥५॥सर्वैर्बहिर्विनिर्याताःसार्धंवैब्रह्मणासुराः॥युक्तमित्येवभाषंतःप्रभोरग्रे
वयंतुके॥६॥तस्थुःप्रांजलयःसर्वेत्रिदशागतमन्यवः॥तस्मिन्क्षणेसमाहूतस्तुंबरुर्मानपूर्वकं॥७॥प्रविवेश
समीपंवैदेव्यादेवस्यचैवहि॥तत्रासीनोयथायोगंनानामूर्छाक्षरान्वितं॥८॥जगौकलपदंहृष्टोविपंचींचाप्य
वादयत्॥विष्णुनाकौशिकप्रीत्यैप्रयुक्तोगायकोत्तमः॥९॥नानारत्नसमायुक्तैर्दिव्यैराभरणोत्तमैः॥दिव्यमा
ल्यैश्चवसनैःपूजिताविष्णुमंदिरात्॥१०॥निर्गतास्तुंबरुर्हृष्टोजगामस्वयथागतं॥ब्रह्माद्यास्त्रिदशाःसर्वेमुन

यस्त्वय्यथागतं ॥११॥ जग्मुर्विष्णुंप्रणम्योच्चैर्जयेतिभाषिणस्ततः ॥ नारदोथमुनिर्दृष्ट्वातुंबरोःसत्क्रियांहरेः ॥१२
शोकाविष्टेनमनसासंतप्तहृदयेक्षणः ॥ चिंतामापेदिवांस्तत्रशोकमूर्छाकुलांतरः ॥१३॥ ततःक्रोधेनमहता
जज्वालमुनिपुंगवः ॥ लक्ष्मीशशापसहसातद्दासीभिस्तिरस्कृतः ॥१४॥ यदहंरक्षसंभावंगृहीत्वाविष्णुकांत
या ॥ चेटीभिर्वारितोदूरंवेत्राघातेनताडितः ॥१५॥ तस्मात्त्वंजायतांलक्ष्मीरक्षसांगर्भसंभवा ॥ यतोहंबहिरा
क्षिप्तश्चेटीभिःसावहेलनं ॥१६॥ हेलयाराक्षसीचत्वांबहिःक्षेप्स्यतिभूतले ॥ इत्युक्तेनारदेनाथचकंपेभुवनत्र
यं ॥१७॥ हाहाकारंततश्चक्रुर्देवगंधर्वदानवाः ॥ नारदोविललापाथधिङ्मांधिङ्मामितिब्रुवन् ॥१८॥ नारा
यणस्समायोगीमहालक्ष्मीसमीपतः ॥ अहोतुंबरुणाप्राप्तोधिङ्मांमूढमचेतनं ॥१९॥ योयंहरेःसन्निकाशा
द्दूतैर्निर्वासितःकथं ॥ जीवन्यास्यामिकुत्राहंकिंमेतुंबरुणाकृतं ॥२०॥ रोदमानोमुहुर्विद्वान्धिङ्मामितिचविं
तयन् ॥ ततोनारायणोलक्ष्म्याःशापंश्रुत्वासुदारुणं ॥२१॥ लक्ष्म्यासहहृषीकेशआजगामयतोमुनिः ॥ रमा
प्रसादयतविप्रंप्रत्युवाचकृतांजलिः ॥२२॥ यदुक्तंभवतामह्यंतत्तथानतदन्यथा ॥ तत्रकिंचित्प्रार्थयामिमुनेत्त
त्कृपयाकुरु ॥२३॥ आरण्यानांमुनीनांवैलोकंलोकंचशोणितं ॥ कलशापूरितंभक्षेद्राक्षसीयाचकामतः ॥

॥२४॥तस्यागर्भेभविष्यामितच्छ्रोणितसमुद्भवा॥इत्युक्तंमयाचिंतासंभवान्नोभवेदिति॥२५॥नारदस्तुतच्छ्रु
त्वाहअस्याःसर्वैहिदारुणं॥ततोनारायणोदेवःप्रोक्तवान्नारदंमुनिं॥२६॥नाहंदानेनतपसानेज्ययानापि
तीर्थतः॥संतुष्यामिद्विजश्रेष्ठयथानाम्नांप्रकीर्तनात्॥२७॥गानेननामगुणयोर्ममसायुज्यमाप्नुयात्॥
निदर्शनंकौशिकोनगानान्महल्लोकमाप्तवान्॥२८॥मूर्छनादिसुतंगानंनाम्नामतिममप्रियं॥तुंबरुस्तत्र
भावेनप्रियस्त्वत्तोपिमेद्विज॥२९॥मूर्छनातालयोगेनगानेनत्वंतथाभव॥उलूकंपश्यगत्वात्वंयदिगा
नमतिस्तव॥३०॥मानसोत्तरशैलेतुगानबंधुरितिस्मृतः॥तद्गच्छशीघ्रंशैलेंद्रंगानवांस्त्वंभविष्यसि॥३१॥
इत्युक्तोविस्मयाविष्टोनारदोवाग्विदांवरः॥मानसोत्तरशैलेतुगानबंधुंजगामवै॥३२॥गंधर्वाःकिन्नराय
क्षास्तथाचाप्सरसांगणाः॥समासीनास्तुपरितोगानबंधुश्चमध्यतः॥३३॥गानशिक्षासमापन्नाःशिक्षिता
स्तेनपक्षिणा॥स्निग्धकंठस्वरास्तत्रसमासीनामुदान्विताः॥३४॥ततोनारदमालोक्यगानबंधुरुवाचह॥प्र
णिपत्ययथान्यायंस्वागतेनाभ्यपूजयत्॥३५॥किमर्थंभगवन्नत्रचागतोसिमहाद्युते॥किंकार्यंहिमहाब्र
ह्मन्ब्रूहिकिंकरवाणिते॥३६॥तच्छ्रुत्वानारदोधीमान्प्रत्युवाचसपक्षिणं॥उलूकेंद्रमहाप्राज्ञशृणुसर्वंयथात

यं॥३७॥ममवृत्तंप्रवक्ष्यामितच्चभूतंमहाद्भुतं॥वैकुंठनगरेब्रह्मन्नारायणसमीपगं॥३८॥मांविनिर्द्धूयसं
हृष्टंसमाहूयचतुंबरुं॥लक्ष्मीसमन्वितोविष्णुस्सृणोद्गानमुत्तमं॥३९॥ब्रह्मादयोवयंसर्वेनिरस्ताःस्था
नतश्च्युताः॥कौशिकाद्याःसमासीनागानयोगेनवैहरिं॥४०॥समाराध्यैवसंप्राप्तागाणपत्यंयथासुखं॥
तेनाहमतिदुःखार्तोयत्तप्तंतुमयातपः॥४१॥यद्दत्तंयद्धुतंचैवयच्चापिश्रुतमेवहि॥यदधीतंचगानस्यक
लांनार्हतिषोडशीं॥४२॥विष्णोर्माहात्म्ययुक्तस्यगानयोगस्यवैततः॥पश्चात्तापंचमेदृष्ट्वामांचनारायणोब्र
वीत्॥४३॥उलूकंगच्छदेवर्षेगानबंधुंमतिर्यदि॥गानेचवर्ततेब्रह्मंस्तत्त्वंगानमाप्स्यसि॥४४॥इत्यहंप्रे
षितस्तेनत्वत्समीपमिहागतः॥किंकरिष्यामिशिष्योहंतवमांपालयाव्यय॥४५॥नारदंप्राहधर्मात्मागा
नबंधुर्महायशाः॥शृणुनारदयद्वृत्तंपुराममममहामते॥४६॥अत्याश्चर्यसमायुक्तंसर्वपापहरंस्सुभं॥भुवनेश
इतिख्यातोराजाभूद्धार्मिकःपुरा॥४७॥अश्वमेधसहस्रैश्चवाजपेयायुतेनच॥अन्यैश्चविविधैर्यज्ञैरिष्ट
वान्भूरिदक्षिणैः॥४८॥गवांकोट्यर्बुदंचैवसुवर्णस्यतथैवच॥वाससांरथनागानांकन्याश्वानांतथैवच॥
॥४९॥दत्वासराजाविप्रेभ्योमेदिनींपर्यपालयत्॥न्यवारयत्स्वकेराज्येगानयोगेनकेशवं॥५०॥अन्यंवागा

नयोगेनगायेद्यदिसमेभवेत्॥वद्यःसर्वात्मनातस्माद्देवैरीड्यःपरःपुमान्॥५१॥नब्राह्मणैश्चगातव्यंवह
द्भिर्वेदमुत्तमं॥गानयोगेनसर्वत्रक्षत्रियोगायंतुमांसदा॥५२॥सूतमागधसंघाश्चगीतमेकारसंतुवै॥इ
त्याज्ञाप्यमहातेजाराज्यंवैपर्यपालयत्॥५३॥तस्यराज्ञःपुराभ्याशेहरिमित्रइतिस्मृतः॥ब्राह्मणोविष्णु
भक्तश्चसर्वद्वंद्वविवर्जितः॥५४॥नदीपुलिनमासाद्यप्रतिमांचहरेःशुभां॥अभ्यर्च्यचयथाशास्त्रंघृतद
ध्युत्तरंबहु॥५५॥मिष्टान्नंपायसंदत्वाहरेरावेद्यधूपकं॥प्रणिपत्ययथान्यायंतत्रविन्यस्तमानसः॥५६॥
आगायतहरिंतत्रतालवीणालयान्वितं॥अतीवस्नेहसंयुक्तस्तदातेनांतरात्मना॥५७॥ततोराज्ञःसमादे
शाद्दूतास्तस्यसमागताः॥तदर्चनादिसकलंनिधूयचसमंततः॥५८॥ब्राह्मणंचगृहीत्वातेराज्ञेसम्यङ्न्य
वेदयन्॥ततोराजाद्विजश्रेष्ठंपरिभर्त्स्यसुदुर्मनाः॥५९॥राज्यान्निर्वासयामासहृत्वासर्वंधनादिकं॥प्रति
मांचहरेश्चैवनापश्यत्तस्यहृच्छया[1]॥६०॥ततःकालेनमहताकालधर्ममुपेयिवान्॥लोकांतरमनुप्राप्यउ
लूकंदेहमाश्रितः॥६१॥सर्वत्रगच्छमानोपिभक्ष्यंकिंचिन्नचाप्तवान्॥क्षुधार्तश्चसदाखिन्नोयममाहसुदुः
खितः॥६२॥क्षुत्पीडावर्ततेदेवदुर्गतस्यसदामम॥मयापापंकृतंकिंवाकिंकरिष्यामिवैयम॥६३॥ततस्तं

[1] आत्मनेपदमार्षं

धर्मराट्प्राहधर्मोधर्मप्रदर्शकः॥त्वयाहिसुमहत्पापंकृतमज्ञानतोनृप॥६४॥हरिमित्रंप्रतितदावासुदेवपरा
यणं॥हरिमित्रेकृतंपापंवासुदेवार्चनादिषु॥६५॥तेनपापेनसंप्राप्तःक्षुद्बोधस्त्वांसदानृप॥दानयज्ञादिकंस
र्वंप्रनष्टंतेनराधिप॥६६॥गीतनाट्यलयोपेतंगायमानंसदाहरिं॥हरिमित्रंसमाहूयहृतवानसितद्धनं॥६७॥ः
उपहारादिकंसर्वंवासुदेवस्यसन्निधौ॥तवभृत्याःसमाहृत्यपापंचक्रुस्तवाज्ञया॥६८॥हरेःकीर्तिंविनाचान्य
द्ब्राह्मणेननृपोत्तम॥नगेभ्ययोगेमंतव्यंतस्मात्पापंत्वयाकृतं॥६९॥नष्टंतेस्वर्गलोकाद्यंगच्छपर्वतकोटरं॥
पूर्वोत्तरंस्वदेहंतेखादन्नित्यंनिकृत्यवै॥७०॥तस्मिन्क्षीणेत्विमंदेहंखादनित्यंक्षुधान्वितः॥महानिरयसं
स्थस्त्वंयावन्मन्वंतरंभवेत्॥७१॥मन्वंतरेततोऽतीतेभूम्यांत्वंश्वाभविष्यसि॥ततःकालेनकियतामानुष्यम
नुलप्स्यसे॥७२॥एवमुक्त्वायमोविद्वांस्तत्रैवांतरधीयत॥सोहंनारदभूपालःपुरेदानीमुलूकतां॥७३॥लब्ध
वान्कर्मदोषेणहरिमित्रकृतेनवै॥ततोमानसशैलेहंकोटरेह्यवसंमुने॥७४॥पूर्वोमृतकदेहोमेभक्षणायह्यु
पस्थितः॥क्षुधान्वितोहंतंदेहंखादितुंह्युपचक्रमे॥७५॥तत्क्षणंदैवयोगेनहरिमित्रोमहायशाः॥विमाने
नार्कवर्णेनस्तूयमानोऽप्सरोगणैः॥७६॥विष्णुदूतैःपरिवृतःपश्चात्तेनागतोनृप॥विष्णुभक्तोमहातेजाःपथि

१ तवेतिशेषः

मांदृष्टवान्प्रभुः॥७७॥भुवनेशशरीरंतद्दुर्दैवोलूकसन्निधौ॥दृष्टोहंतेनदय्यापाशावसन्निधिसंस्थितः॥७८॥
भुवनेशस्यनृपतेर्दैहोयंदृश्यतेखग॥उलूक त्वंचकिमिदंखादितुंचोद्यतोभवान्॥७९॥तच्छ्रुत्वाहरिमित्रा
यप्रणम्यविनयान्वितः॥कृतांजलिपुटोभूत्वाबहुमानपुरःसरं॥८०॥तत्सर्वंपूर्ववृत्तांतंनारदास्यैन्यवे
दयम्॥पुरापराद्धंत्वयियत्तस्यपाकोयमागतः॥८१॥यावन्मन्वंतरंविप्रखादिष्यामिशवंत्विमं॥ततः
श्वाहंभविष्यामिभविष्यामिततोनरः॥८२॥एतदाकर्ण्यकरुणोहरिमित्रोमहायशाः॥कृपयामांसमाच
ष्टशृणूलूकमहीपते॥८३॥मयित्वयापराद्धंयत्तत्सर्वंक्षांतवानहं॥शावोह्यदर्शनंयातुनचश्वात्वंभवि
ष्यसि॥८४॥त्वामद्युगानन्योगश्चप्राप्नोतुमत्प्रसादतः॥स्तुहिविष्णुंवगानेननजिह्वास्पष्टाचजायतां॥८५॥
सुरविद्याधराणांचगंधर्वाप्सरसांतथा॥गानाचार्योभवेथास्त्वंभक्ष्यभोज्यसमन्वितः॥८६॥ततःकतिपयां
होभिःसर्वंभद्रंभविष्यति॥हरिमित्रवचस्तच्चविष्णुदूतोपबृंहितं॥८७॥सर्वंनिरयसंघंतंमेक्षणादेवव्यनाश
यत्॥एवंकृताविष्णुभक्तानामीदृशीकरुणाद्विज॥८८॥कृतापराधलोकानामपिदुःखंव्यपोहति॥अमृतस्यं
दिवचनमुक्त्वासप्रययौहरिं॥८९॥सर्वंतेकथितंयेनगानाचार्योऽहमुत्तमः॥प्राप्स्यामिहरिमैतेनहरिमित्रप्र

सादृतः ॥८०॥ नारदैतदनुवर्णितं मया पूर्वजन्मचरितं महाद्भुतं ॥ यः शृणोति हरिमेत्य चेतसा स प्रयाति भवनं गदा
भृतः ॥८१॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अद्भुतोत्तरकांडे हरिमित्रोपाख्यानं नाम षष्ठः सर्गः
॥६॥ ॥ गानबंधुः पुनः प्राह नारदं मुनिसत्तमं ॥ एते किन्नरसंघा वै विद्याध्राप्सरसांगणाः ॥१॥ गानाचार्यमुलू
कं मां गानशिक्षार्थमागताः ॥ तपसा नैव शक्त्या वा गानविद्या तपोधन ॥२॥ तस्मात्क्रमेण युक्तश्च मत्तस्त्वं गा
नमाप्नुहि ॥ एवमुक्तो मुनिस्तस्मै प्रणिपत्य जगौ यथा ॥३॥ तच्छृणुष्व मुनिश्रेष्ठ वासुदेवं नमस्य च ॥ उलूके
नैवमुक्तस्तु नारदो मुनिसत्तमः ॥४॥ शिक्षाक्रमेण संयुक्तस्तत्र गानमशिक्षत ॥ गानबंधुस्तमाहेदं त्यक्तल
ज्जो भवाधुना ॥५॥ स्त्रीसंगमे तथा गीते श्रुते त्वाख्यानसंगमे ॥ व्यवहारे च धान्यानाम र्थानां च तथैव च ॥६॥
आये व्यये तथा नित्यं त्यक्तलज्जस्तु वै भवेत् ॥ न कुंठितेन गूढेन नित्यं प्रावरणादिभिः ॥७॥ हस्तविक्षेपभावे
न व्यादितास्येन चैव हि ॥ निर्यातजिव्हायोगेन न गेयं च कथंचन ॥८॥ स्वांगं निरीक्षमाणेन परमप्रेक्षता तथा
॥ न गायेदूर्ध्वबाहुश्च नोर्ध्वदृष्टिः कथंचन ॥९॥ हासो भयं क्षुधा कंपः शोको न्यस्य स्मृतिस्तृषा ॥ नैतानि सप्त
[1]रूपाणि गानयोगे महामते ॥१०॥ नैकहस्तेन शस्येत तालसंघट्टनं मुने ॥ क्षुधार्तेन भयार्तेन तृषार्तेन तथै

[1] अनुरूपाणि योग्यानीति यावत् ॥

अ०
दु०
१५

वच॥११॥गानयोगोनकर्त्तव्योनांधकारेकथंचन॥एवमादीनियोग्यानिकर्त्तव्यानिमहामुने॥१२॥एवमुक्तःसभग
वान्नारदोविधिरक्षणे॥अशिक्षततथागीतंदिव्यवर्षसहस्रकं॥१३॥ततःसमस्तसंपन्नोगीतप्रस्तावकादिषु
॥विपंच्यादिषुसंपन्नःसर्वस्वरविभागवित्॥१४॥अयुतानिचषट्त्रिंशत्सहस्राणिशतानिच॥स्वराणांभेदयो
गेनज्ञातवान्मुनिसत्तमः॥१५॥ततोगंधर्वसंघाश्चकिन्नराणांतथागणाः॥मुनिनासहसंयुक्ताःप्रीतियुक्तास्तु
तेऽभवन्॥१६॥गानबंधुंमुनिःप्राहप्राप्यगानमनुत्तमं॥त्वांसमासाद्यसंपन्नंत्वंहिगीतविशारदः॥१७॥ध्वांक्षश
त्रोमहाप्राज्ञकिमवाप्यंकरोमिते॥गानबंधुस्ततश्चाहनारदंमुनिपुंगवं॥१८॥ब्रह्मणोदिवसेब्रह्मन्मन
वःस्युश्चतुर्दश॥ततस्त्रैलोक्यसंज्ञावोभविष्यतिमहामुने॥१९॥तावन्मेस्याद्यशोभागस्तावन्मेपरमंशुभं॥म
नस्याध्यापितंमेस्याद्दाक्षिण्यान्मुनिसत्तम॥२०॥उलूकंप्राहदेवर्षिःसर्वंतेस्तुमनोगतं॥अतीतेकल्पसंयोगे
गरुडस्त्वंभविष्यसि॥२१॥गुणगानादच्युतस्यसायुज्यंतस्यलप्स्यसे॥स्वस्तितेस्तुमहाप्राज्ञगमिष्यामिप्रसी
दमे॥२२॥एवमुक्त्वाप्ययौविप्रोजेतुंतुंबुरुमुत्तमं॥तुंबुरोश्चगृहाभ्याशेददर्शविकृताकृतीन्॥२३॥कृत्तबाहू
रुपादांश्चकृत्तनासाक्षिवक्षसः॥कृत्तोत्तमांगांगुलींश्चछिन्नभिन्नकलेवरान्॥२४॥पुंसःस्त्रियश्चविकृतान्द

ए०
१५

दर्शायुतशो वहून्॥नारदेनचतेप्रोक्ताःकेयूयंक्षतविग्रहाः॥२४॥नारदंप्रोचुरपितेत्वयाकृत्तांगकावयं॥वयं
रागाश्चरागिण्योगानेनभिन्नसंधिना॥२५॥भवतागीयतेयर्हितर्ह्येवस्येदृशीहिनः॥पुनस्तुंबुरुगानेनच्छि
न्नभिन्नप्ररोहणं॥२७॥तुंबुरुर्जीवयत्येषत्वंमारयसिनारद॥तदाश्चर्यंमहद्दृष्ट्वाश्रुत्वाचविस्मयान्वितः॥२८
॥धिक्धिगित्युक्त्वाजगामाथनारदोपिजनार्दनं॥श्वेतद्वीपेसभगवान्नारदंप्राहमाधवः॥२९॥गानबंधोचयद्ज्ञा
नंनचैतेनासिपारगः॥तुंबुरोःसदृशोनासिगानेनानेननारद ॥३०॥मनोर्वैवस्वतस्याहमष्टाविंशतितमेयु
गे॥द्वापरांतेभविष्यामियदुवंशकुलोद्भवः॥३१॥देवक्यांवसुदेवस्यकृष्णनाम्नामहामुने॥तदानींमांसमा
गम्यस्मारयैतद्यथातथं॥३२॥तत्रत्वांगानसंपन्नंकरिष्यामिमहाव्रत॥तुंबुरोश्चसमंचैवचतथातिशयसं
युतं॥३३॥तावत्कालंयथायोगंदेवगंधर्वयोनिषु॥शिक्षस्वत्वंहियथान्यायमित्युक्त्वांतरधीयत॥३४॥ततोमु
निःप्रणम्यैनंवीणावादनतत्परः॥देवर्षिर्देवसंकाशःसर्वाभरणभूषितः॥३५॥तपसांनिधिरत्यर्थंवासुदे
वपरायणः॥स्कंधेविपंचीमाधायसर्वलोकांश्चचालसः॥३६॥वारुणंयाम्यमाग्नेयमैंद्रंकौवेरमेवच॥४
वायव्यंचतथैशानंसंशयंप्राप्यधर्मवित्॥३७॥गायमानोहरिंसम्यग्वीणावादविचक्षणः॥गंधर्वाप्सर

अ०
दु०
३
१९

स्तांसंघैःपूज्यमानस्ततस्ततः॥३८॥ब्रह्मलोकंसमासाद्यकस्मिंश्चित्कालपर्यये॥हाहाहूहूश्चगंधर्वौगीतवाद्य
विशारदौ॥३९॥ब्रह्मणोगायकौदिव्यौनित्यंगंधर्वसत्तमौ॥तत्रताभ्यांसमासाद्यगायमानोहरिंविभुं॥४०॥ब्र
ह्मणाचमहातेजाःपूजितोमुनिसत्तमः॥तंप्रणम्यमहात्मानंसर्वलोकपितामहं॥४१॥चचारचयथाकामं
सर्वलोकेषुनारदः॥पुनःकालेनमहतागृहंप्राप्यचतुंबुरोः[1]॥४२॥वीणामादायतत्रस्थस्तत्रस्थैरप्यलक्षितः
॥सुरकन्याश्चतत्रस्याःषड्जाद्याःसहधैवताः॥४३॥व्रीडितोभगवान्दृष्ट्वानिर्गतश्चससत्वरं॥शिक्षयामास
बहुशस्तत्रतत्रमहामुनिः॥४४॥कालेतीतेततोविष्णुरवतीर्णोजगन्मयः॥देवक्यांवसुदेवस्ययादवोसौम
हाद्युतिः॥४५॥सप्तस्वरांगनाद्रष्टुंगानविद्याविशारदः॥ययौरैवतकेकृष्णंप्रणिपत्यमहामुनिः॥४६॥व्यज्ञा
पयदशेषंतच्छ्रुतद्वीपेत्वयापुरा॥नारायणेनकथितंगानयोगार्थमुत्तमं॥४७॥तच्छ्रुत्वाप्रहसन्कृष्णःप्राहजां
बवतींमुदा॥एनंमुनिवरंभद्रेशिक्षयस्वयथाविधि॥४८॥वीणामानसमायोगेतथेत्याहचसापतिं॥प्रहसं
तीयथायोगंशिक्षयामासतंमुनिं॥४९॥ततःसंवत्सरेपूर्णेनारदंप्राहकेशवः॥सत्याःसमीपमागच्छशिक्ष
स्वचतथापुनः॥५०॥तथेत्युक्त्वासत्यभामांप्रणिपत्यययौमुनिः॥तयासशिक्षितोविद्वान्पूर्णेसंवत्सरेततः॥

रा०
१९

[1] नारदः

॥५१॥वासुदेवनियुक्तोसौरुक्मिण्याःसदनंगतः॥अंगनाभिस्तत्रत्याभिर्दासीभिर्मुनिसत्तमः॥५२॥उक्तोसौ
गायमानोपिनस्वरंवेत्सिवैमुने॥ततःश्रमेणमहतायावत्संवत्सरद्वयं॥५३॥शिक्षितोसौतदादेव्यारुक्मि
ण्याद्विजगौमुनिः॥नतुस्वरांगनाःप्रापतंत्रीयोगेमहामुनिः॥५४॥आहूयकृष्णोभगवान्स्वयमेवमहामुनिं
॥अशिक्षयदमेयात्मागानयोगमनुत्तमं॥५५॥कृष्णाद्दत्तेनगानेनतस्यायातास्वरांगनाः॥ब्रह्मानंदःसम
भवन्नारदस्यचचेतसि॥५६॥ततोद्वेषाद्ययोदोषाःसर्वेअस्तंगताद्विज॥ईर्ष्याचतुंबरौयासीन्नारदस्यच
सागता॥५७॥ततोननर्तदेवर्षिःप्रणिपत्यजनार्दनं॥उवाचचहृषीकेशःसर्वज्ञस्त्वंमहामुने॥५८॥प्राचीन
गानयोगेनगायस्वममसन्निधौ॥एतत्तेप्रार्थितंप्राप्तंममलोकेतथैवच॥५९॥नित्यंतुंबुरुणासार्द्धंगायस्व
चयथातथं॥एवमुक्तोमुनिस्तत्रयथायोगंचचारसः॥६०॥तथासंपूज्ययत्कृष्णंरुद्रंभुवननायकम्॥४
तदाजगौहरेस्तत्रनियोगाच्छंकरालये॥६१॥रुक्मिण्यासत्ययासार्धंजांबवत्यामहामुनिः॥ कृष्णेनचद्विज
श्रेष्ठश्रुतिजातिविशारदः॥६२॥एवंतेमुनिशार्दूलप्रोक्तंगीतक्रमंमया॥ब्राह्मणोवासुदेवाख्यंगायमानो
निशंद्विज॥६३॥हरेसायुज्यमाप्नोतिसर्वयज्ञफलंलभेत्॥अन्यथानरकंगच्छेद्गायमानोन्यदेवहि॥६४॥

कर्मणामनसावाचावासुदेवपरायणः॥ गायन्शृण्वंस्तमाप्नोतितस्माच्छ्रेष्ठःप्रियंवदः॥ ९५॥ कथितमिदमपू
र्वंजानकीजन्मपूर्वंश्रुतिसुखमतिगुह्यंस्नेहतस्तेऽतिबाह्यं॥ कलुषकुलविपक्षंभव्यदानैकदक्षंनृभिरविरतवं
द्यंसर्वदेवाभिनंद्यं॥ ९६॥ ॥इत्यार्षेश्रीरामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेनारदगानप्राप्ति
र्नामसप्तमःसर्गः॥ ७॥ ॥पद्मासाशोणितोद्भूताराक्षसीगर्भसंभवा॥ यथाभूमितलोत्पन्नाजानकीचयथा
हिसा॥ १॥ सीतातच्छ्रुणुविप्रेंद्रवर्णयामितवानघ॥ दशास्योरावणोनामतपस्तप्तुमनोदधे॥ २॥ त्रैलोक्यस्याधि
पत्यायअजरामरणायच॥ बहुवर्षंतपस्तप्त्वाज्वलनार्कसमोऽज्वलत्॥ ३॥ तत्तेजसाजगत्सर्वंदह्यमानंयदा
भवत्॥ तमुवाचतदाब्रह्मासमागत्यसुरैर्वृतः॥ ४॥ पौलस्त्यविरमाद्यत्वंतपसोममवाक्यतः॥ तपसोग्रेणम
हतालोकाभस्मीकृताइव॥ ५॥ वरंददामितेवत्सयत्तेमनसिवर्तते॥ तपोधनलभस्वाद्यवरदान्मत्तईक्षितं॥
६॥ न्यवारयतचक्षूंषिस्सूर्यबिंबावलोकनात्॥ प्रणिपत्यजगन्नाथंवरंवव्रेसरावणः॥ ७॥ देहिसर्वामरत्वंमे
वरदोसियदिप्रभुः॥ तदाकर्ण्यवचोब्रह्मापुनःप्राहसरावणं॥ ८॥ नहिसर्वामरत्वंतेवरमन्यंवृणीष्वमे॥ ततः
सरावणःप्राहकूटवादीहिराक्षसः॥ ९॥ नसुरानासुरायक्षाःपिशाचोरगराक्षसाः॥ विद्याधराःकिन्नरावातथै

वाप्सरसांगणाः॥१०॥नहन्युर्मांकथंचित्तेदेहिमेवरमुत्तमं॥अन्यच्चतेवृणेब्रह्मंस्तच्छृणुष्वपितामह॥११॥आत्म
नोदुहितामोहाद्दस्यर्थंप्रार्थिताभवेत्॥तदामृत्युर्ममभवेद्यदिकन्यानकांक्षति॥१२॥तथेत्युक्त्वाजगामाशु
ब्रह्मालोकपितामहः॥नरान्नाजीगणद्रक्षोमत्वातांस्तृणवद्द्विज॥१३॥ब्रह्मदत्तवरोराजारावणोवरदर्पितः॥
त्रैलोक्यजयसर्वस्वंप्राप्तवान्बाहुवीर्यतः॥१४॥एकदारावणोराजादंडकारण्यमागतः॥तत्रर्षीनग्निकल्पांश्च
दृष्ट्वामनस्यचिंतयत्॥१५॥एतान्नजित्वाहिकथंत्रिलोकीजयभागहं॥एषांवधेनचश्रेयोनपश्यामिमहात्म
नां॥१६॥दुरात्मासविचिंत्यैतत्प्राहतान्मुनिपुंगवान्॥अहंसर्वस्यजगतःशास्ताचजयभागहं॥१७॥भवतांज
यमाकांक्षेजयंदत्तद्विजर्षभाः॥इत्युक्त्वासशराग्रेणक्षताच्छोणितमंगतः॥१८॥बलादाकृष्यतेषांवैकल
शेऽस्थापयत्प्रभुः॥तत्रगृत्समदोनामशतपुत्रपिताद्विजः॥१९॥दुहित्रर्थेभार्ययासप्रार्थितोभगवान्मुनिः॥:
लक्ष्मीर्मेदुहिताभूयादित्यसौकलशेविभुः॥२०॥दुग्धंचाहरहस्तत्रकुशाग्रेणसमंत्रतः॥स्थापयत्येषनियत
स्तदहर्निर्ययौवनं॥२१॥तद्दिनेदैवयोगेनकलशेतत्ररावणः॥मुनीनांशोणितंस्थाप्यगृहीत्वास्वगृहंययौ॥२२
॥भार्यांमंदोदरींप्राहकलशंरक्षसुंदरि॥विषादप्यधिकंविद्धिशोणितंकलशेस्थितं॥२३॥नदेयंनापिवाभक्ष्यं

मुनिनांशोणितंत्विदं॥त्रैलोक्यजयलाभेनरावणोलोकरावणः॥२४॥देवदानवयक्षाणांगंधर्वाणांचकन्यकाः
॥आहृत्यरमयामासमंदरेसह्यपर्वते॥२५॥हिमवन्मेरुविंध्याद्रौरमणीयवनेतथा॥मंदोदरीतयादृष्ट्वाप
त्तिंसाहिमनस्विनी॥२६॥आत्मानंगर्हयामासभर्तुःस्नेहमपश्यती॥धिक्जीवितंहिनारीणांयौवनंकुल
मेवच॥२७॥वंचिताःपतिनायाःस्युस्तस्मान्मेमरणंवरं॥पुरा[illegible]णसंदिष्टंशोणितंक्ष्वेडतोऽधिकं॥२८॥
पपौमरणमाकांक्ष्यपतिनावंचितासती॥लक्ष्मीशरण[1]दुग्धेनमिश्रिताच्छोणितादभूत॥२९॥सद्योरावण
कांतायागर्भोज्वलनसन्निभः॥ततोविस्मयमापन्नासाहिमंदोदरीशुभा॥३०॥पीतंविषाधिकंरक्तंगर्भ
स्तेनाभवन्मम॥इतिसंचिंतयामासभर्ताविप्रोषितोमम॥३१॥कामिनीभिःक्रीडतेसकामीभर्ताहिरावणः॥
संवत्सरमिमंभर्त्रासहमेवसतिर्नहि॥३२॥किंवक्तव्यंमयासाध्व्यागर्भिण्याभर्तृसंसदि॥चिंतयादग्धगात्री
वतीर्थसेवनच्छद्मना॥३३॥विमानवरमारुह्यकुरुक्षेत्रंजगामसा॥तत्रगर्भंविनिक्षिप्यनिचखानभुवस्तले
॥३४॥स्नात्वासरस्वतीतोयेपुनरायात्स्वमालयं॥नचोदितंतत्कस्मैचिद्रहःकार्यंसुगोपितं॥३५॥कालेन।
कियताब्रह्मन्जनकर्षिर्महामनाः॥कुरुक्षेत्रंसमासाद्यजांगलेयज्ञमावहन्[2]॥३६॥स्वर्णलांगलमादाय

---

[1] आश्रयः

[2] कुर्वन्

यज्ञभूमिंचकारसः॥स्वर्णलांगलसीतांतःकन्यकाभ्रोत्थिताभवत्॥४७॥पुष्पवृष्टिश्चमहतीपपातकन्यकोपरि॥तद्दृष्ट्वामहदाश्चर्यंराजाविस्मयमागतः॥४८॥कर्तव्येमूढतामापतत्तःखेभूत्सरस्वती॥राजन्गृहाणकन्यांत्वंपालयैनांमहाप्रभां॥४९॥ज्वलनार्कसमांदिव्यांमहत्कार्यंतवालये॥भविष्यतिमहाभागक्षेमंचजगतोऽनया॥५०॥यज्ञसंपाद्यतांराजन्नायंविघ्नस्तवानघ॥नामास्याःकिलसीतेतिसीतायाउत्थितायतः॥५१॥कल्पयैनांदुहितरमित्युक्त्वावाक्तिरोहिता॥तच्छ्रुत्वाप्रीतिमान्राजायज्ञंकृत्वामहाधनं॥५२॥जगामसीतामादायमहिषीभ्यश्चतांददौ॥एतत्तेकथितंविप्रसीताजन्मैककारणं॥श्रुत्वैतत्सर्वंपापेभ्योमुक्तोभवतिमानवः॥५३॥जनकदुहितृजन्मश्रावयित्वातुश्रुत्वानपुनरिहहिजन्मप्राप्नुयात्पुण्यवांश्च॥दशरथसुतकांतातस्यगेहंकदाचिद्धिसृजतिनहिसर्वैःपातकैर्मुच्यतेच॥५४॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेश्रीसीतोत्पत्तिर्नामाऽष्टमःसर्गः॥८॥ ॥छ॥

रामःसीतापरिणयंकृत्वादशरथादिभिः॥भ्रातृभिश्चापिसहितोभार्ययासहसीतया॥१॥अयोध्यांगंतुमारेभेनानावाद्यपुरःसरं॥आर्चीकनंदनोरामोभार्गवोरेणुकासुतः॥२॥तस्यदाशरथिःश्रुत्वारामस्याक्लिष्टकर्म

मिणः॥विवाहकौतुकंवीरःपश्चातेनसमागमत्॥३॥धनुरादायतद्दिव्यंक्षत्रियाणांनिवर्हणं॥जिज्ञासमानो
रामस्यवीर्यंदाशरथेस्तथा॥४॥सतमभ्यागतंदृष्ट्वाउद्यतास्त्रमवस्थितं॥प्रहसन्निवविप्रेंद्रंरामोवचनम
ब्रवीत्॥५॥स्वागतंतेमुनिश्रेष्ठकिंकार्यंकरवाणिते॥प्रोवाचभार्गवोवाक्यंस्वागतेनकिमस्तिमे॥६॥क्षत्र
कालंहिराजेंद्रधनुरेतन्ममास्तिहि॥समारोपययत्नेनयदिशक्तोसिराघव॥७॥इत्युक्तस्त्वाहभगवंस्त्व
न्नाधिक्षेप्तुमर्हसि॥नहिनत्वधमोधर्मःक्षत्रियाणांद्विजातिषु॥८॥इक्ष्वाकूणांविशेषेणबाहुवीर्येणकस्य
नं॥तमेववादिनंतत्ररामोवचनमब्रवीत्॥९॥अलंवागुपदेशेनधनुरप्यच्छराघव॥ततोजग्राहरोषेणक्ष
त्रियर्षभसूदनं॥१०॥रामोदाशरथिर्दिव्यंहस्ताद्रामस्यकार्मुकं॥धनुरारोपयामाससलीलमिवराघवः॥
११॥ज्याशब्दमकरोत्तत्रस्मयमानःसवीर्यवान्॥तस्यशब्देनभूतानिवित्रेसुरशनेरिव॥१२॥अथाब्रवीद्वचो
रामंरामोदाशरथिस्तदा॥इदमारोपितंब्रह्मन्किमन्यत्करवाणिते॥१३॥तस्यरामोददौदिव्यंजामदग्न्योम
हाबलः॥शरमाकर्णदेशांतमयमाकृष्यतामिति॥१४॥एतच्छ्रुत्वाब्रवीद्रामःप्रदीप्तइवमन्युना॥श्रूयते

१ द्विजातिषुब्राह्मणेषुविषयेबाहुवीर्येणकस्यनरूपोऽधमोधर्मःक्षत्रियाणांनहि नहि इक्ष्वाकूणांतुविशेषेणनहिनहीसन्वयः॥

क्षम्यतेचैवदर्पपूर्णोसिभार्गव॥१५॥त्वयाह्यधिगतंतेजःक्षत्रियेभ्योविशेषतः॥पितामहप्रसादेनतेनमांक्षि
पसिध्रुवं॥१६॥पश्यमांस्वेनरूपेणचक्षुस्तेवितराम्यहं॥इत्युक्त्वाप्रददौतस्मैरामोदिव्यांदृशंतदा॥१७॥ततो
रामशरीरेवैरामोपश्यत्सभार्गवः॥आदित्यान्सवसून्रुद्रान्साध्यांश्चसमरुद्गणान्॥१८॥पितॄन्हुताशनांश्चै
वनक्षत्राणिग्रहांस्तथा॥गंधर्वान्राक्षसान्यक्षान्नदीस्तीर्थानियानिवै॥१९॥ऋषीन्वैविखिलान्यांश्चब्रह्मभू
तान्सनातनान्॥देवर्षींश्चैवकार्त्स्न्येनसमुद्रान्पर्वतांस्तथा॥२०॥वेदांश्चसोपनिषदान्वषट्कारान्सहाध्वरैः
॥ऋचोयजूंषिसामानिधनुर्वेदंचसर्वशः॥२१॥विद्युतोमेघवृंदानिवर्षाणिचमहाव्रत॥ततःसभगवान्वि
ष्णुस्तंवैबाणंमुमोचह॥२२॥शुष्काशनिसमाकीर्णमहोल्काभिश्चसुव्रत॥पांसुवर्षेणमहतामेघसंघैश्चकेवलं
॥२३॥भूमिकंपैःसनिर्घातैर्नादैश्चविपुलैरपि॥भार्गवंविह्वलंकृत्वातेजश्चाक्षिप्यकेवलं॥२४॥अगच्छज्ज्वलि
तोरामंशरोबाहुप्रचोदितः॥सतुविह्वलतांगत्वाप्रतिलभ्यचचेतनां॥२५॥रामःप्रत्यागतप्राणःप्राणमद्विष्णुते
जसं॥विष्णुनासोभ्यनुज्ञातोमहेंद्रमगमत्पुनः॥२६॥भीतश्चतत्रन्यवसद्विनीतश्चमहातपाः॥ततःसंवत्सरे
ऽतीतेहृतौजसमवस्थितं॥२७॥निर्मदंदुःखितंदृष्ट्वापितरोराममब्रुवन्॥नवैसम्यगिदंपुत्रविष्णुमासाद्यवैकृ

तं॥२८॥सहिपूज्यश्चमान्यश्चत्रिषुलोकेषुसर्वदा॥गच्छपुत्रनदींपुण्यांवधूसरकृतालपां॥२९॥तत्रोपस्पृश्य
तीर्थेषुपुनर्वपुरवाप्स्यसि॥दीप्तोदंनामतत्तीर्थंयत्रतेप्रपितामहः॥३०॥भृगुर्देवयुगेरामतप्तवानुत्तमंतपः॥
ततथाकृतवान्रामोभार्गवोवचनात्पितुः॥३१॥प्राप्तवांश्चपुनस्तेजोभारद्वाजमहामुने॥एतद्यःशृणुयाद्य
स्तुरामचारित्रमुत्तमं॥सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति॥३२॥ततोरामोजानकीस्पृष्टपाणिःसूतैर्भत्तु
मागधैःस्तूयमानः॥पुष्पासारैरास्तृतोदेवसंघैःसउत्तरान्कोसलानाजगाम॥३३॥ ॥इत्यार्षेश्रीमद्रामायणे
वाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेजामदग्न्यविश्वरूपदर्शनंनामनवमःसर्गः॥९॥ ॥अथसीतालक्ष्म
णाभ्यांसहकेनापिहेतुना॥जगामविपिनंरामोदंडकारण्यमाश्रितः॥१॥तत्रगोदावरीतीरेपर्णशालांवि
धायसः॥उवासकंचित्कालंवैमृगयामभिकारयन्॥२॥कदाचिद्रावणोमोहे[1]हृत्वंकायांतान्यवासयत्॥ताम
दृष्ट्वाततोरामोलक्ष्मणश्चमहाबलः॥३॥आरटतुश्चारवींसर्वांसीतादर्शनलालसौ॥रामस्यरुदतस्तस्यवाष्प
वारिसमुद्भवा॥४॥नदीवैतरणीचाभूच्चसुघोराशुमुद्भवं॥वितरत्यसुवैयस्मादतोवैतरणीस्मृता॥५॥पितृ
णांतरणंयस्मात्रणांस्नानेनतर्पणात्॥तेनापिकारणेनासौनदीवैतरणीस्मृता॥६॥नेत्रयोर्दूषिकापाश्वता

---

१ मोहमुत्पाद्य

भिःशैलास्ततोभवन्॥सुग्रीवेणवानरेणसख्यंकर्तुंमहामनाः॥७॥ऋष्यमूकमगाद्रामोलक्ष्मणेनानुजेनच॥पंच
भिर्मंत्रिभिःसार्द्धंसुग्रीवोनामवानरः॥८॥यत्रास्तेवालिभयतःसोपश्यद्रामलक्ष्मणौ॥चापवाणधरौवीरौग्र
संताविवचांबरं॥९॥तौदृष्ट्वासुमह त्त्रस्तोवालिपस्यावमन्यत॥प्रास्थापयद्धनूमंतंभिक्षुरूपेणवानरं॥१०
आत्मानंदर्शयामासहनूमान्रामलक्ष्मणौ॥कोभवानितिचोक्ते थचतुर्बाहुंकिरीटिनं॥११॥शंखचक्रगदापा
णिंवनमालाविभूषितं॥श्रीवत्सवक्षसंदेवंपीतवाससमच्युतं॥१२॥लक्ष्मीसरस्वतीभ्यांचसंश्रितोभयपार्श्व
कं॥ब्रह्मपुत्रैःसनंदाद्यैःस्तूयमानंसमंततः॥१३॥देवर्षिपितृगंधर्वैःसिद्धविद्याधरोरगैः॥सेव्यमानंमहात्मा
नंपुंडरीकविलोचनं॥१४॥सहस्रसूर्यसंकाशंशातचंद्रशुभाननं॥फणासहस्रमतुलंधारयंतंचलक्ष्मणं॥
१५॥अनंतंरामशिरसिआतपत्रंफणागणैः॥दधानंसर्वलोकेशंनागसंघैश्चसंस्तुतं॥१६॥आत्मानंदर्शया
मासरामचंद्रोहनूमते॥तद्रूपंहनुमान्लक्ष्यकिमेतदितिविस्मितः॥१७॥क्षणंनिमील्यनयनेपुनःसोऽपश्यदद्भु
तं॥स्तुत्वानत्वाचवहुधासोऽब्रवीद्राघवंवचः॥१८॥अहंसुग्रीवसचिवोहनुमान्नामवानरः॥सुग्रीवेणप्रेषि
तोहंयुवानौज्ञातुमागतः॥१९॥दृष्ट्वायुवांचद्विभुजौचापवाणधरौपरं॥आगत्यचान्यथादृष्टंवदमेकोभवानिति

॥२०॥इतिपवनसुतंतंव्याकुलंव्याहरंतंकिमितिकथमितीदंकंपमानंप्लवंगं॥कृतकरपुटमौलिंसंविधेयंभवंतं
मधुरतरमुदारंरामचंद्रोब्रवीत्॥२१॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेश्रीराम
चतुर्भुजरूपदर्शनंनामदशमःसर्गः॥१०॥ ॥रामःप्राहहनूमंतमात्मानंपुरुषोत्तमः॥वत्सवत्सहनूमंस्त्वंभ
क्तोपत्यइवानसि॥१॥ततेऽहंसंप्रवक्ष्यामिशृणुष्वावहितोमम॥अवाच्यमेतद्विज्ञानमात्मगुह्यंसनातनं॥२॥
यन्नदेवाविजानंतियतंतोपिद्विजातयः॥इदंज्ञानंसमाश्रित्यब्रह्मभूताद्विजोत्तमाः॥३॥नसंसारंप्रपश्यंतिपू
र्वेपिब्रह्मवादिनः॥गुह्याद्गुह्यतमंसाक्षाद्गोपनीयंप्रयत्नतः॥४॥वक्ष्येभक्तिमतोह्यस्यभवंतिब्रह्मवादिनः॥आ
त्मायःकेवलःस्वच्छःशांतःसूक्ष्मःसनातनः॥५॥अस्तिसर्वांतरःसाक्षाच्चिन्मात्रस्तमसःपरः॥सोंतर्यामीस
पुरुषःसप्राणःसमहेश्वरः॥६॥सकालाग्निस्तदव्यक्तंसद्योवेदयतिश्रुतिः॥अस्माद्विजायतेविश्वमत्रैवप्रवि
लीयते॥७॥मायावीमाययाबद्धःकरोतिविविधास्तनूः॥नचाप्ययंसंसरतिनचसंसारयेत्प्रभुः॥८॥नायंपृ
थ्वीनसलिलंनतेजःपवनोनभः॥नप्राणोनमनोव्यक्तंनशब्दःस्पर्शएवच॥९॥नरूपरसगंधाश्चनाहंकर्तान
वागपि॥नपाणिपादौनोपायुर्नचोपस्थंप्लवंगम॥१०॥नकर्तानचभोक्तावानचप्रकृतिपूरुषौ॥नमायानैवचप्राण

श्चैतन्यं परमार्थतः॥११॥यथाप्रकाशतमसोः संबंधोनोपपद्यते॥तद्वदेवनसंबंधः प्रपंचपरमात्मनोः॥१२॥छा
यातपौयथालोके परस्परविलक्षणौ॥तद्वत्प्रपंचपुरुषौविभिन्नौपरमार्थतः॥१३॥यद्यात्मामलिनोऽस्व
स्थोविकारीस्यात्स्वभावतः॥नहितस्यभवेन्मुक्तिर्जन्मांतरशतैरपि॥१४॥पश्यंतिमुनयोमुक्ताः स्वात्मानंपर
मार्थतः॥विकारहीनंनिर्दुःखमानंदात्मानमव्ययं॥१५॥अहंकर्तासुखीदुःखीकृशःस्थूलेतियामतिः॥
साप्यहंकृतिसंबंधादात्मन्यारोप्यतेजनैः॥१६॥वदंतिवेदविद्वांसःसाक्षिणंप्रकृतेःपरं॥भोक्तारमक्षयंबु
द्ध्वासर्वत्रसमवस्थितं॥१७॥तस्मादज्ञानमूलोयंसंसारःसर्वदेहिनां॥अज्ञानादन्यथाज्ञानंतच्चप्रकृतिसंगतं
॥१८॥नित्योदितःस्वयंज्योतिःसर्वगःपुरुषःपरः॥अहंकाराविवेकेनकर्ताहमितिमन्यते॥१९॥पश्यंतिऋ
षयोव्यक्तंनित्यंसदसदात्मकं॥प्रधानंप्रकृतिंबुद्ध्वाकारणंब्रह्मवादिनः॥२०॥तेनायंसंगतोह्यात्माकूट
स्थोपिनिरंजनः॥आत्मानमक्षरंब्रह्मनावबुद्ध्यंतितत्त्वतः॥२१॥अनात्मन्यात्मविज्ञानंतस्माद्दुःखंतथेतर
त्॥रागद्वेषादयोदोषाःसर्वेभ्रांतिनिबंधनाः॥२२॥कार्येह्यस्यभवेदेषापुण्यापुण्यमितिश्रुतिः॥तद्वशादेव
सर्वेषांसर्वदेहसमुद्भवः॥२३॥नित्यःसर्वत्रगोह्यात्माकूटस्थोदोषवर्जितः॥एकःसभिद्यतेशक्त्यामाययान

स्वभावतः॥२४॥तस्माददैतमेवाहुर्मुनयःपरमार्थतः॥भेदोऽव्यक्तस्वभावेनसाचमायात्मसंश्रया॥२५॥यथाहि
धूमसंपर्कान्नाकाशोमलिनोभवेत्॥अंतःकरणजैर्भावैरात्मातद्वन्नलिप्यते॥२६॥यथास्वप्रभयाभाति
केवलःस्फटिकोपलः॥उपाधिहीनोविमलस्तथैवात्माप्रकाशते॥२७॥ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्ष
णाः॥अर्थस्वरूपमेवाज्ञाःपश्यंत्यन्येकुदृष्टयः॥२८॥कूटस्थोनिर्गुणोव्यापीचैतन्यात्मास्वभावतः॥दृश्य
तेह्यर्थरूपेणपुरुषैर्भ्रांतिदृष्टिभिः॥२९॥यथासंलक्ष्यतेव्यक्तःकेवलःस्फटिकोजनैः॥रक्तिकाऽव्यवधाने
नतद्वत्परमपूरुषः॥३०॥तस्मादात्माक्षरःशुद्धोनित्यःसर्वगतोव्ययः॥उपासितव्योमंतव्यःश्रोतव्यश्च
मुमुक्षुभिः॥३१॥यदामनसिचैतन्यंभातिसर्वत्रगंसदा॥योगिनोऽव्यवधानेनतदासंपद्यतेस्वयं॥३२॥
यदासर्वाणिभूतानिस्वात्मन्येवाभिपश्यति॥सर्वभूतेषुचात्मानंब्रह्मसंपद्यतेतदा॥३३॥यदासर्वाणिभूता
निसमाधिस्थोनपश्यति॥एकीभूतःपरेणासौतदाभवतिकेवलः॥३४॥यदासर्वेप्रमुच्यंतेकामायेऽस्यहृदि
स्थिताः॥तदासावमृतीभूतःक्षेमंगच्छतिपंडितः॥३५॥यदाभूतपृथग्भावमेकस्थमनुपश्यति॥ततएवचवि
स्तारंब्रह्मसंपद्यतेतदा॥३६॥यदापश्यतिचात्मानंकेवलंपरमार्थतः॥मायामात्रंजगत्कृत्स्नंतदाभवतिनिर्वृतः

॥३७॥यदाजन्मजरादुःखव्याधीनामेकभेषजं॥केवलंब्रह्मविज्ञानंजायतेऽसौ[1]तदाशिवः॥३८॥यथानदीनदालो
केसागरेणैकतांययुः॥तद्वदात्माक्षरेणासौनिष्कलेनैकतांव्रजेत्॥३९॥तस्माद्विज्ञानमेवास्तिनप्रपंचोनसंस्थि
तिः॥अज्ञानेनावृतंलोकेविज्ञानंतेनमुह्यति॥४०॥तज्ज्ञानंनिर्मलंसूक्ष्मंनिर्विकल्पंयदव्ययं॥अज्ञानमिति
तत्सर्वंविज्ञानमितिमेमतं॥४१॥एतत्तेपरमंसांख्यंभावितंज्ञानमुत्तमं॥सर्ववेदांतसारंहियोगस्तत्रैकचि
त्तता॥४२॥योगात्संजायतेज्ञानंज्ञानाद्योगःप्रजायते॥योगज्ञानाभियुक्तस्यनावाप्यंविद्यतेक्वचित्॥४३॥
यदेवयोगिनोयांतिसांख्यंतदभिगम्यते॥एकंसांख्यंचयोगंचयःपश्यतिसतत्त्ववित्॥४४॥अन्येचयोगि
नोवत्सऐश्वर्यासक्तचेतसः॥मज्जंतितत्रतत्रैवसत्वात्मैक्यमितिश्रुतिः॥४५॥यत्तत्सर्वगतंदिव्यमैश्वर्यमच
लंमहत्॥ज्ञानयोगाभियुक्तस्तुदेहांतेतदवाप्नुयात्॥४६॥एषआत्माहमव्यक्तोमायावीपरमेश्वरः॥की
र्तितःसर्ववेदेषुसर्वात्मासर्वतोमुखः॥४७॥सर्वकामःसर्वरसःसर्वगंधोऽजरोऽमरः॥सर्वतःपाणिपादोऽहमं
तर्यामीसनातनः॥४८॥अपाणिपादोजवनोऽगृहीतोहृदिसंस्थितः॥अचक्षुरपिपश्यामितथाऽकर्णःशृ
णोम्यहं॥४९॥वेदाहंसर्वमेवेदंनमांजानातिकश्चन॥प्राहुर्महांतंपुरुषंमामेकंतत्त्वदर्शिनः॥५०॥निर्गुणा

१ ज्ञाता

मलरूपस्यय तदैश्वर्यमनुत्तमं ॥ यन्नदेवा विजानंति मोहिता माययाममा ॥ ५१ ॥ यन्मेगुह्यतमं देहं सर्वगं तत्त्वदर्शि
नः ॥ प्रविशाममसायुज्यं लभंते योगिनोऽव्ययं ॥ ५२ ॥ येषां हि न समापन्ना माया वै विश्वरूपिणी ॥ लभंते पर
मं शुद्धं निर्वाणं ते मया सह ॥ ५३ ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ प्रसादान्मम ते वत्स एतद्वेदानुशास
नं ॥ ५४ ॥ नापुत्रशिष्ययोगिभ्यो दातव्यं हनुमन्क्वचित ॥ यदुक्तमेतद्विज्ञानं सांख्ययोगसमाश्रयं ॥ ५५ ॥ ∴ ॥
॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अद्भुतोत्तरकांडे सांख्ययोगो नामैकादशः सर्गः ॥ ११ ॥:
पुनरेमः प्रवचनमुवाच द्विजपुंगव ॥ अव्यक्तादभवत्कालः प्रधानं पुरुषः परः ॥ १ ॥ तेभ्यः सर्वमिदं जातं तस्मा
त्सर्वमहं जगत् ॥ सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखं ॥ २ ॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ सर्वें
द्रियगुणाभासं सर्वेंद्रियविवर्जितं ॥ ३ ॥ सर्वाधारं स्थिरानंदमव्यक्तं द्वैतवर्जितम् ॥ सर्वोपमानरहितं प्रमा
णातीतगोचरं ॥ ४ ॥ निर्विकल्पं निराभासं सर्वाभासं परामृतं ॥ अभिन्नं भिन्नसंस्थानं शाश्वतं ध्रुवमव्ययं ॥ ५
निर्गुणं परमं व्योमतज्ज्ञानं सूरयो विदुः ॥ स आत्मा सर्वभूतानां सबाह्याभ्यंतरः परः ॥ ६ ॥ सोहं सर्वत्रगः शांतो
ज्ञानात्मा परमेश्वरः ॥ मया ततमिदं विश्वं जगदव्यक्तरूपिणा ७ ॥ मत्स्थानि सर्वभूतानि यस्तं वेद स वेदवि

त्॥प्रधानं पुरुषश्चैव तत्त्वद्वयमुदाहृतं॥८॥तयोरनादिर्निर्दिष्टः कालः संयोजकः परः॥त्रयमेतदनाद्यंतम
व्यक्ते समवस्थितं॥९॥तदात्मकं तदन्यत्स्यात्तद्रूपं मामकं विदुः॥महदाद्यं विशेषांतं संप्रसूतेखिलं जगत्॥
१०॥या सा प्रकृतिरुद्दिष्टा मोहिनी सर्वदेहिनां॥पुरुषः प्रकृतिस्थोपि भुंक्ते यः प्राकृतान् गुणान्॥११॥अहं
काराविविक्तत्वात्प्रोच्यते पंचविंशकः॥आद्यो विकारः प्रकृतिर्महानात्मेति कथ्यते॥१२॥विज्ञानशक्तिर्वि
ज्ञानादहंकारस्तदुत्थितः॥एक एव महानात्मा सोहंकारोभिधीयते॥१३॥स जीवः सोंतरात्मेति गीयते तत्त्व
चिंतकैः॥तेन वेदयते सर्वं सुखं दुःखं च जन्मसु॥१४॥स विज्ञानात्मकस्तस्य मनः स्यादुपकारकं॥तेनाविवे
कतस्तस्मात्संसारः पुरुषस्य तु॥१५॥स चाविवेकः प्रकृतौ संगात्कालेन सोभवत्॥कालः सृजति भूतानि
कालः संहरते प्रजाः॥१६॥सर्वे कालस्य वशगा न कालः कस्यचिद्वशे॥सोंतरा सर्वमेवेदं नियच्छति सनातनः
॥१७॥प्रोच्यते भगवान् प्राणः सर्वज्ञः पुरुषः परः॥सर्वेंद्रियेभ्यः परमं मनः प्राहुर्मनीषिणः॥१८॥मनसश्चाप्य
हंकारमहंकारान्महान्परः॥महतः परमव्यक्तमव्यक्तात्पुरुषः परः॥१९॥पुरुषाद्भगवान्प्राणस्तस्य सर्वमिदं जग
त्॥प्राणात्परतरं व्योम व्योमातीतोग्निरीश्वरः॥२०॥सोहं सर्वत्रगः शांतो ज्ञानात्मा परमेश्वरः॥नास्ति मत्परमं भू

तंमांविज्ञायविमुच्यते॥२१॥नित्यंहिनास्तिजगतिभूतंस्थावरजंगमं॥ऋतेमामेकमव्यक्तंव्योमरूपंमहेश्वरं॥
२२॥सोहंसृजामिसकलंसंहरामिसदाजगत्॥मायीमायामयोदेवःकालेनसहसंगतः॥२३॥मत्संनिधावे
षकालःकरोतिसकलंजगत्॥नियोजयत्यनंतात्माह्येतद्वेदानुशासनं॥२४॥ ॥इत्यार्षेश्रीमद्रामायणेवा
ल्मीकीये आदिकाव्येअद्भुतोत्तरकांडेउपनिषत्कथनंनामद्वादशःसर्गः॥१२॥ ॥वक्ष्येसमाहितमनाःशृणु
ष्वपवनात्मज॥येनेदं लभ्यतेरूपं येनेदंसंप्रवर्तते॥१॥नाहंतपोभिर्विविधैर्नदानेननचेज्यया॥शक्योहिपु
रुषैर्ज्ञातुमृतेभक्तिमनुत्तमां॥२॥अहंहिसर्वभावानामंतस्तिष्ठामिसर्वगः॥मांसर्वसाक्षिणंलोकानजानंतिप्ल
वंगम॥३॥यस्यांतरासर्वमिदंयोहिसर्वांतरःपरः॥सोहंधाताविधाताचलोकेस्मिन्विश्वतोमुखः॥४॥नमांप
श्यंतिमुनयःसर्वेपित्रिदिवौकसः॥ब्राह्मणामनवःशक्रोयेचान्येप्रथितौजसः॥५॥गृणंतिसततंवेदामामेकं
परमेश्वरं॥यजंतिविविधैरग्निंब्राह्मणावैदिकैर्मखैः॥६॥सर्वेलोकानमस्यंतिब्रह्मलोकेपितामहं॥ध्यायं
तियोगिनोदेवंभूताधिपतिमीश्वरं॥७॥अहंहिसर्वयज्ञानांभोक्ताचैवफलप्रदः॥सर्वदेवतनुर्भूत्वासर्वा
त्मासर्वसंस्तुतः॥८॥मांपश्यंतीहविद्वांसोधार्मिकावेदवादिनः॥तेषांसंनिहितोनित्यंयेभक्तामामुपासते॥

॥९॥ब्राह्मणाःक्षत्रियावैश्याधार्मिकामामुपासते॥तेषांददामितत्स्थानमानंदंपरमंपरं॥१०॥अन्येपियेविक
र्मस्थाःशूद्राद्यानीचजातयः॥भक्तिमंतःप्रमुच्यंतेकालेनमयिसंगताः॥११॥नमद्भक्ताविनश्यंतिमद्भक्तावी
तकल्मषाः॥आदावेतत्प्रतिज्ञातंनमेभक्तःप्रणश्यति॥१२॥योवानिंदतितंमूढोदेवदेवंसनिंदति॥योहितं
पूजयेद्भक्त्यासपूजयतिमांसदा॥१३॥पत्रंपुष्पंफलंतोयंमदाराधनकारणात्॥योमेददातिनियतःसमेभ
क्तःप्रियोमतः॥१४॥अहंहिजगतामादौब्रह्माणंपरमेष्ठिनं॥निधायदत्तवान्वेदानशेषानात्मनिःसृतान्॥१५
॥अहमेवहिसर्वेषांयोगिनांगुरुरव्ययः॥धार्मिकाणांचगोप्ताहंनिहंतावेदविद्विषां॥१६॥अहंवैसर्वसंसारान्मो
चकोयोगिनामिह॥संसारहेतुरेवाहंसर्वसंसारवर्जितः॥१७॥अहमेवहिसंहर्तास्रष्टाहंपरिपालकः॥माया।
वीमामिकाशक्तिर्मायालोकविमोहिनी॥१८॥ममैवचपराशक्तिर्यासाविद्येतिगीयते॥नाशयामितयामायांयो
गिनांहृदिसंस्थितः॥१९॥अहंहिसर्वशक्तीनांप्रवर्तकनिवर्तकः॥आधारभूतःसर्वासांनिधानममृतस्यच॥॥
२०॥एकासर्वांतराशक्तिःकरोतिविविधंजगत्॥भूत्वानारायणोनंतोजगन्नाथोजगन्मयः॥२१॥तृतीयामह
तीशक्तिर्निहंतिसकलंजगत्॥तामसीमेसमाख्याताकालात्मारूद्ररूपिणी॥२२॥ध्यानेनमांप्रपश्यंतिके

अ०
द्भु०
२५

विज्ञानेनचापरे॥अपरेभक्तियोगेनकर्मयोगेनचापरे॥सर्वेषामेवभक्तानामेषप्रियतरोमम॥२३॥योहिज्ञाने
नमांनित्यमाराधयतिनान्यथा॥अन्येचयेत्रयोभक्तामदाराधनकांक्षिणः॥२४॥तेपिमांप्राप्नुवंत्येवनावर्तंतेच
वैपुनः॥मयाततमिदंकृत्स्नमेतद्योवेदसोऽमृतः॥२५॥पश्याम्यशेषमेवेदंवर्तमानंस्वभावतः॥करोतिकालेभ
गवान्महायोगेश्वरःस्वयं॥२६॥योगंसंप्रोच्यतेयोगीमायीशास्त्रेषुसूरिभिः॥योगेश्वरोसौभगवान्महादेवोमहा
न्प्रभुः॥२७॥महत्त्वात्सर्वसत्त्वानांपरत्वात्परमेश्वरः॥प्रोच्यतेभगवान्ब्रह्मामहान्ब्रह्ममयोपतः॥२८॥योमामेव
विजानातिमहायोगेश्वरेश्वरं॥सोऽविकंपेनयोगेनयुज्यतेनात्रसंशयः॥२९॥सोहंप्रेरयितादेवःपरमानंदमा
श्रितः॥तिष्ठामियोगीसततंयस्तद्वेदसवेदवित्॥३०॥इतिगुह्यतमंज्ञानंसर्ववेदेषुनिश्चितं॥प्रसन्नचेत
सेदेयंधार्मिकायाहिताग्नये॥३१॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेभ
क्तियोगोनामत्रयोदशःसर्गः॥१३॥ ॥सर्वलोकैकनिर्मातासर्वलोकैकरक्षिता॥सर्वलोकैकसंहर्तासर्वा
त्माहंसनातनः॥१॥सर्वेषामेववस्तूनामंतर्यामीपिताह्यहं॥मय्येवांतःस्थितंसर्वंनाहंसर्वत्रसंस्थितः॥२॥भ
वताचाद्भुतंदृष्टंयत्स्वरूपंतुमामकं॥ममैषाह्युपमावत्समाययादर्शितामया॥३॥सर्वेषामेवभावानामंतरा

ए०
२५

समवस्थितः॥प्रेरयामिजगत्सर्वंक्रियाशक्तिरियंमम॥४॥मयेदंचेष्टतेविश्वं[1]तत्स्वभावानुवर्तिच॥सोहंकालेजगत्कृत्स्नंकरोमिहनुमन्किल॥५॥संहराम्येकरूपेणद्विधावस्थाममैवतु॥आदिमध्यांतनिर्मुक्तोमायातत्त्वप्रवर्तकः॥६॥क्षोभयामिचसर्गादौप्रधानपुरुषावुभौ॥ताभ्यांसंजायतेसर्वंसंयुक्ताभ्यांपरस्परं॥७॥:महदादिक्रमेणैवममतेजोविजृंभितं॥योहिसर्वजगत्साक्षीकालचक्रप्रवर्तकः॥८॥हिरण्यगर्भोमार्तंडःसोपिमद्देहसंभवः॥तस्मैदिव्यंस्वमैश्वर्यंज्ञानयोगंसनातनं॥९॥दत्तवानात्मजान्वेदान्कल्पादौचतुरःकिल॥समन्नियोगतोब्रह्मासदामद्भावभावितः॥१०॥दिव्यंतन्नामकैश्वर्यंसर्वदावहतिस्वयं॥ससर्वलोकनिर्माताममन्नियोगेनसर्ववित्॥११॥भूत्वाचतुर्मुखःसर्गंसृजत्येवात्मसंभवः॥योपिनारायणोनंतोलोकानांप्रभवाप्ययः॥१२॥ममैवपरमामूर्तिःकरोतिपरिपालनं॥योंतकःसर्वभूतानांरुद्रःकालात्मकःप्रभुः॥१३॥मदाज्ञयासोसततंसंहरत्येवमेतनुः॥हव्यंवहतिदेवानांकव्यंकव्याशिनामपि॥१४॥पाकंचकुरुतेवह्निःसोपिमच्छक्तिचोदितः॥भुक्तमाहारजातंयत्पचत्येतदहर्निशं॥१५॥वैश्वानरोग्निर्भगवानीश्वरस्यनियोगतः॥योहिसर्वांभसांयोनिर्वरुणोदेवपुंगवः॥१६॥ससंजीवयतेसर्वमीशस्यैवनियोगतः॥योंतस्ति

---

[1] क्रियाशक्तिस्वभावानुवर्ति

ष्वतिभूतानां बहिर्देवो निरंजनः ॥१७॥ मदाज्ञयासौ भूतानां शरीराणि बिभर्ति हि ॥ योपि संजीवनो नॄणां देवानाममृ
ताकरः ॥१८॥ सोमः स मन्नियोगेन चोदितः किल वर्तते ॥ यः स्वभासा जगत्कृत्स्नं प्रकाशयति सर्वदा ॥१९॥
सूर्यो वृष्टिं वितनुते [1]शास्त्रेणैव स्वयंभुवः ॥ योप्यशेषजगच्छास्ता शक्रः सर्वामरेश्वरः ॥२०॥ यज्ञानां फलदो देवो
वर्तते सौ मदाज्ञया ॥ यः प्रशास्ता ह्यसाधूनां वर्तते नियमादिह ॥२१॥ यमो वैवस्वतो देवो देवदेवनियोगतः ॥ ः
योपि सर्वधनाध्यक्षो धनानां संप्रदायकः ॥२२॥ सोपीश्वरनियोगेन कुबेरो वर्तते सदा ॥ यः सर्वरक्षसां नाथस्ता
मसानां फलप्रदः ॥२३॥ मन्नियोगादसौ देवो वर्तते निर्ऋतिः सदा ॥ वेतालगणभूतानां स्वामी भोगफलप्रदः ॥२४
॥ ईशानः सर्वभक्तानां सोपि तिष्ठन्ममाज्ञया ॥ यो वामदेवोंगिरसः शिष्यो रुद्रगणाग्रणीः ॥२५॥ रक्षको योगिनां
नित्यं वर्तते सौ मदाज्ञया ॥ यश्च सर्वजगत्पूज्यो वर्तते विघ्नकारकः ॥२६॥ विनायको धर्मनेता सोपि मद्वचना
त्किल ॥ योपि वेदविदां श्रेष्ठो देवसेनापतिः प्रभुः ॥२७॥ स्कंदोसौ वर्तते नित्यं स्वयंभूप्रतिचोदितः ॥ ये च प्रजा ।
नां पतयो मरीच्याद्या महर्षयः ॥२८॥ सृजंति विविधं लोकं परस्यैव नियोगतः ॥ या च श्रीः सर्वभूतानां ददाति वि
पुलां श्रियं ॥२९॥ पत्नी नारायणस्यासौ वर्तते मदनुग्रहात् ॥ वाचं ददाति विपुलां या च देवी सरस्वती ॥३०॥ ए

[1] आज्ञयैव

सापीश्वरनियोगेनचोदितासंप्रवर्तते॥याप्येषपुरुषान्घोरान्नरकात्तारयत्यपि॥३१॥सावित्रीसंस्मृतादेवीदेवाज्ञा
नुविधायिनी॥पार्वतीपरमादेवीब्रह्मविद्याप्रदायिनी॥३२॥यापिध्याताविशेषेणसापिमद्वचनानुगा॥योनंतोम
हिमानंतःशेषोऽशेषामरप्रभुः॥३३॥दधातिशिरसालोकंसोपिदेवनियोगतः॥योग्निःसंवर्तकोनित्यंवडवारू
पसंस्थितः॥३४॥पिबत्यखिलमंभोधिमीश्वरस्यनियोगतः॥आदित्यावसवोरुद्रामरुतश्चतथाश्विनौ॥३५॥अ
न्याश्चदेवताःसर्वामच्छासनमधिष्ठिताः॥गंधर्वाउरगायक्षाःसिद्धाःसाध्याश्चचारणाः॥३६॥भूतरक्षःपिशा
चाश्चस्थिताःशास्त्रेस्वयंभुवः॥कलाकाष्ठानिमेषाश्चमुहूर्तादिवसाःक्षपाः॥३७॥ऋत्वब्दमासपक्षाश्चस्थि
ताःशास्त्रेप्रजापतेः॥युगमन्वंतराण्येवममतिष्ठंतिशासने॥३८॥पराश्चैवपरार्द्धाश्चकालभेदास्तथापरे॥
चतुर्विधानिभूतानिस्थावराणिचराणिच॥३९॥नियोगादेववर्त्ततेसर्वाण्येवस्वयंभुवः॥पत्तनानिचसर्वाणि
भुवनानिचशासनात्॥४०॥ब्रह्मांडानिचवर्त्ततेदेवस्यपरमात्मनः॥अतीतान्यप्यसंख्यानिब्रह्मांडानिमदाज्ञ
या॥४१॥प्रवृत्तानिपदार्थौघैःसहितानिसमंततः॥ब्रह्मांडानिभविष्यंतिसहवस्तुभिरात्मगैः॥४२॥हरिष्यंतिस
दैवाज्ञांपरस्यपरमात्मनः॥भूमिरापोनलोवायुःखंमनोबुद्धिरेवच॥४३॥भूतादिरादिप्रकृतिर्नियोगान्ममवर्त्तते

॥याशेषसर्वजगतांमोहिनीसर्वदेहिनां॥४४॥मायापिवर्त्ततेनित्यंसापीश्वरनियोगतः॥विधूयमोहकलिलं
यथापश्यतितत्पदं॥४५॥सापिविद्यामहेशस्यनियोगाद्वशवर्त्तिनी॥बहुनात्रकिमुक्तेनममशक्त्यात्मकंजग
त्॥४६॥मय्येवपूर्यतेविश्वंमय्येवप्रलयंव्रजेत्॥अहंहिभगवानीशःस्वयंज्योतिःसनातनः॥४७॥परमात्मापरं
ब्रह्ममत्तोह्यन्यन्नविद्यते॥इत्येतत्परमंज्ञानंभवतेकथितंमया॥४८॥ज्ञात्वाविमुच्यतेजंतुर्जन्मसंसारबंधना
त्॥मायामाश्रित्यजातोहंगृहेदशरथस्यहि॥४९॥रामोहंलक्ष्मणोह्येषशत्रुघ्नोभरतोपिच॥चतुर्धासंप्रभूतो
हंकथितंतेऽनिलात्मज॥५०॥मायास्वरूपंचतवकथितंयत्प्लवंगम॥कृपयातद्दृढाधार्यंनविस्मर्तव्यमेवहि
॥५१॥येनेदंपठ्यतेनित्यंसंवादोभवतोमम॥जीवन्मुक्तोभवेत्सोपिसर्वपापैःप्रमुच्यते॥५२॥श्रावयेद्यद्विजान्शु
द्धान्ब्रह्मचर्यपरायणान्॥योवाविचारयेदर्थंसयातिपरमांगतिं॥५३॥यश्चैतच्छृणुयान्नित्यंभक्तियुक्तोदृढ
व्रतः॥सर्वपापविनिर्मुक्तोब्रह्मलोकेमहीयते॥५४॥तस्मात्सर्वप्रयत्नेनपठितव्योमनीषिभिः॥श्रोतव्यश्चापि
मंतव्योविशेषाद्ब्राह्मणैःसदा॥४५५ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेभगव
द्धनुमत्संवादोनामचतुर्दशःसर्गः॥ १४ ॥ ::॰:: ॥ ध्यात्वाहृदिस्थंप्रणिपत्यमूर्ध्नाबद्धांजलिर्वायुसुतोमहात्मा

ओंकारमुच्चार्य विलोक्य देवमंतःशरीरे निहितं गुहायां॥१॥ रामं महात्मानमकुंठशक्तिं सनंदमुख्यैः स्तुतमप्रमेयं॥ तुष्टाव च ब्रह्ममयैर्वचोभिरानंदपूर्णायतमानसः सन्॥२॥ त्वामेकमीशं पुरुषं पुराणं प्राणेश्वरं राममनंतयोगं॥ नमामि सर्वांतरसन्निविष्टं प्रचेतसं ब्रह्ममयं पवित्रं॥३॥ पश्यंति त्वां मुनयो ब्रह्मयोनिं दांताः शांता विमलं रुक्मवर्णं॥ ध्यात्वात्मस्थमचलं स्वे शरीरे कविं परेभ्यः परमं परं च॥४॥ त्वत्तः प्रसूता जगतः प्रसूतिः सर्वात्मसृष्टेः परमाणुभूतः॥ अणोरणीयान्महतो महीयांस्त्वामेव सर्वं प्रवदंति संतः॥५॥ हिरण्यगर्भो जगदंतरात्मा त्वत्तोधिजातः पुरुषः पुराणः॥ सजायमानो भवता विसृष्टो यथाविधानं सकलं ससर्ज॥६॥ त्वत्तो वेदाः सकलाः संप्रवृत्तास्त्वय्येवांते संस्थितिं ते लभंते॥ पश्यामि त्वां जगतो हेतुभूतं नृत्यंतं स्वे हृदये संनिविष्टं॥७॥ त्वयैवेदं भ्राम्यते ब्रह्मचक्रं मायावी त्वं जगतामेकनाथः॥ नमामि त्वां शरणं संप्रपद्ये योगात्मानं चित्पतिं दिव्यनृत्यं॥८॥ पश्यामि त्वां परमाकाशमध्ये नृत्यंतं ते महिमानं स्मरामि॥ सर्वात्मानं बहुधा संनिविष्टं ब्रह्मानन्दमनुभूयानुभूय॥९॥ ओंकारस्ते वाचको मुक्तिबीजं त्वामक्षरं प्रकृतौ गूढरूपं॥ तं त्वां सत्यं प्रवदंतीह संतः स्वयंप्रभं भवतो यत्प्रकाशं॥१०॥ स्तुवंति त्वां सततं सर्वदेवा नमंति त्वामृषयः क्षीणदोषाः॥ शांतात्मानः सत्यसंधं

वरिष्ठंविप्रांतित्वांयतयोब्रह्मनिष्ठाः॥११॥एकोवेदोवहुशाखोह्यनंतस्त्वामेवैकंबोधयत्येकरूपं॥संवेद्यंत्वां
शरणंयेप्रपन्नास्तेषांशांतिःशाश्वतीनेतरेषां॥१२॥भवानीशोऽणिमादिमांस्तेजोराशिर्ब्रह्माविश्वंपरमेष्ठीव
रिष्ठः॥आत्मानंदंचानुभूयानुशेतेस्वयंज्योतिर्वचनोनित्यमुक्तः॥१३॥एकोदेवस्त्वंकरोषीहविश्वंत्वंपालय
सखिलंविश्वरूपः॥त्वय्येवांतेविलयंविंदतीदंनमामित्वांशरणंत्वांप्रपन्नः॥१४॥त्वामेकमाहुःपरमंच
रामंप्राणंवहंतंहरिमित्रमीशं॥इंदुंमृत्युमनलंचेकितानंधातारमादित्यमनेकरूपं॥१५॥त्वमक्षरंपरमंवे
दितव्यंत्वमस्यविश्वस्यपरंनिधानं॥त्वमव्ययःशाश्वतोधर्मगोप्तासनातनस्त्वंपुरुषोत्तमोसि॥१६॥त्वमे
वविष्णुश्चतुराननस्त्वंत्वमेवरुद्रोभगवानपीशः॥त्वंविश्वनाभिःप्रकृतिःप्रतिष्ठासर्वेश्वरस्त्वंपरमेश्वरोसि
॥१७॥त्वामेकमाहुःपुरुषंपुराणमादित्यवर्णंतमसःपरस्तात॥चिन्मात्रमव्यक्तमचिंत्यरूपंखंब्रह्मशून्यंप्रक
तिंनिर्गुणंच॥१८॥यदंतरासर्वमिदंविभातियदव्ययंनिर्मलमेकरूपं॥किमप्यचिंत्यंतवरूपमेतत्तदंतरायत्प्र
तिभातितत्त्वं॥१९॥योगेश्वरंरूपमनंतशक्तिंपरायणंब्रह्मतनुंपवित्रं॥नमामसर्वेशरणार्थिनस्त्वांप्रसीदभू
ताधिपतेप्रसीद॥२०॥त्वत्पादपद्मस्मरणादशेषसंसारबीजंविलयंप्रयाति॥मनोनियम्यप्रणिधायकायंप्र

साद्याम्येकरसंभवंतं ॥२१॥ नमोस्तुरामायभवोद्भवायकालायसर्वैकहरायतुभ्यं ॥ नमोस्तुरामायकपर्दिने
तेनमोऽग्नयेदर्शयरूपमग्र्यं ॥२२॥ ततःसभगवान्रामोलक्ष्मणेनसहप्रभुः ॥ संहृत्यपरमंरूपंप्रकृतिस्थो
भवत्स्वयं ॥२३॥ स्ततस्यस्तवमाकर्ण्यवायुपुत्रस्यधीमतः ॥ प्राहगंभीरयावाचाहनुमंतंरघूत्तमः ॥२४॥ स्तो
ष्यंतियेनयास्तुत्यातेयास्यंतिपरांगतिं ॥ स्थिरोभवहनूमंस्त्वंकार्यमौपयिकंकुरु ॥२५॥ ॥इत्यार्षेश्रीम
द्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेहनुमत्कृतस्तवराजेपंचदशाःसर्गः ॥१५॥ ॥ः॥
रामःप्रसादहचपुनर्हनूमंतंमहाद्युतिः ॥ रक्षसामेहताभार्यारावणेनदुरात्मना ॥१॥ सुग्रीवेणसमंसख्यंकारया
द्यप्लवंगम ॥ हसित्वामधुरंवीरोहनूमानब्रवीद्वचः ॥२॥ तवभार्यामहाभागरावणेनहृतेतियत् ॥ विश्वंपश्येद
माभातितथेदंप्रतिभातिमे ॥३॥ तथापिप्रभुणादिष्टंकार्यमेवहिकिंकरैः ॥ इत्युक्त्वाहनुमांस्तूर्णंप्रसन्नेनांतरा
त्मना ॥४॥ आरोप्यस्कंधयोर्वीरौसुग्रीवांतिकमानयत् ॥ तौदृष्ट्वापुरुषव्याघ्रौसुग्रीवोवानरोत्तमः ॥५॥ वालिनं
तंजितंमेनेप्राप्तांमेनेरुमांस्त्रियं ॥ सख्यंचकाररामेणदिष्ट्यादिष्ट्येतिचाब्रवीत् ॥६॥ वालिनोविलयंकृत्वाराज्यं
चास्मैनिवेद्यच ॥ नानादेश्यान्वानरांश्चआनाय्यरघुनंदनौ ॥७॥ हनूमदंगदारूढौभ्रातरौरामलक्ष्मणौ ॥ सिंधो

स्तटंतीमयतुःसुग्रीवेणसहप्रभुः॥८॥पारेसमुद्रंलंकांचनिरूप्याहरघूत्तमः॥वानराहिपथायांतिलंकांलक्ष्मण
तत्कुरु॥९॥रामस्यवचनंश्रुत्वासमुद्रंप्राहलक्ष्मणः॥सिंधोस्त्वंस्तंभयात्मानंपथायास्यंतिवानराः॥१०॥सिंधु
स्तुप्रभुणादिष्टंनशुश्रावयदातदा॥लक्ष्मणःक्रोधसंदीप्तःपपाताब्धेर्जलांतरे॥११॥तद्देहवन्हिशिखयाशुशो
षजलधेर्जलं॥यादांसिस्थलभाजीनिदेवाभीतादिशोऽद्रवन्॥१२॥तद्दृष्ट्वामहदाश्चर्यंवानराविस्मयंगताः
॥हाहाकारंप्रचक्रुस्तेलोकाःसर्वेचराचराः॥१३॥ऋषयोभूतसंघाश्चस्वस्तिस्वस्तीतिचाब्रुवन्॥राघवोलक्ष्म
णंप्राहनैतद्युक्तंत्वयाकृतं॥१४॥पुनरेनंपूरयामिसीताविरहजेनवै॥अश्रुणेतिप्रतिज्ञायतंतथाऽपूरयत्प्रभुः
॥१५॥रामोपरितदाकाशात्पुष्पवृष्टिःपपातह॥लोकाश्चसुस्थिताआसंश्चिंतयित्वापुनःपुनः॥१६॥सिंधुना
संस्तुतोरामःसेतुंसिंधौबबंधह॥लंकायांरावणंहत्वासगणंमधुसूदनः॥१७॥आरोप्यपुष्पकेसीतांविभी
षणसहायवान्॥अयोध्यामगमद्रामःसुग्रीवहनुमदादिभिः॥१८॥आनंदयोजयामासभ्रातृन्मातृश्चबांध
वान्॥राजासर्वस्यलोकस्यप्रजानामनुरंजनः॥१९॥रामंराजानमासाद्यतिर्यञ्चोपिययुर्मुदं॥देवदुंदुभयोने
दुःसर्वदाहिनभस्तले॥ववर्षुर्जलदाःकालेपुष्पवृष्टिःपपातच॥२०॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मी।

१अक्षराधिक्यमार्षं

कीयेआदिकाव्येअद्भुतोत्तरकांडेरामराज्योपलंभनंनामषोडशःसर्गः ॥१६॥ ॥प्राप्तराज्यस्यरामस्यराक्षसा
नांक्षयेकृते ॥ आजग्मुर्मुनयस्तत्रराघवंप्रतिनंदितुं ॥१॥ विश्वामित्रोयवक्रीतोरैभ्यश्च्यवनएवच ॥ कण्वश्च
मुनिशार्दूलोयेपूर्वांदिशमाश्रिताः ॥२॥ स्वस्त्यात्रेयश्चनमुचोप्रमुचोऽगस्त्यएवच ॥ आजग्मुर्मुनयस्तत्रयेश्रि
ताद्दक्षिणांदिशं ॥३॥ उपगुःकामठोधूम्रोरौद्राम्बोमुनिपुंगवः ॥ आजग्मुर्मुनयस्तत्रयेप्रतीचींसमाश्रिताः ॥
४॥ शिष्योपशिष्यसहितावसिष्ठप्रमुखर्षयः ॥ आजग्मुर्हिमहात्मानउत्तरांदिशमाश्रिताः ॥५॥ प्राप्यतेतु
महात्मानोराघवस्यनिवेशनं ॥ गृहीत्वाफलमूलानिहुताशसमविग्रहाः ॥६॥ राघवंप्रतिनंद्याथविविशुः
परमासने ॥ राघवश्चमहातेजाःसीतयासहसुव्रत ॥७॥ भ्रातृभिर्मंत्रिभिःसार्द्धंपौरैःश्रेणिमुखैस्तथा ॥ वि
नीतउपसंगम्यपूजयामासतान्मुनीन् ॥८॥ अगस्त्यप्रमुखाविप्रादिष्ट्यादिष्ट्येतिचाब्रुवन् ॥ राघवंप्रशशं
सुस्तेमुनयोवाग्विदांवराः ॥९॥ त्वंहिदेवोजगन्नाथोजगतामुपकारकः ॥ रावणस्यसपुत्रस्यसामात्यस्यव
धात्प्रभो ॥१०॥ जगदेतन्महाबाहोपुनर्जातमिवाभवत् ॥ नरावणादभ्यधिकोदुष्टोलोकभयंकरः ॥११॥ द
शास्यैर्दशदिक्कार्यमाज्ञापयतिराक्षसः ॥ सदशास्योहतोरामदिष्ट्याचजगदुद्धृतं ॥१२॥ भगवानसिभूपाल

ब्रह्मणा प्रार्थितः पुरा॥ पुंडरीकविशालाक्षः श्याम आजानुबाहुकः॥१३॥ अयोध्यायां प्रादुरभूदिक्ष्वाकुकुलनं
दनः॥ त्वद्दर्शनान्महाबाहो निर्वृत्ताः स्मो वयं प्रभो॥१४॥ तपश्चरणसहितास्त्वत्प्रसादाद्दूनेव वने॥ किंतु
सीता महादेवी प्राप दुःखं महत्प्रभो॥१५॥ तदेव स्मर्यमाणं सच्चित्तमुद्वेजयेद्धि नः॥ एवमुक्ते तु मुनिभिः सानु
क्रोशं पुनः पुनः॥१६॥ जहास मधुरं साध्वी सीता जनकनंदिनी॥ उवाच सस्मितं देवी तान्मुनीन्मितभाषि
णी॥१७॥ मुनयो यद्यदुक्तं हि रावणस्य वधं प्रति॥ परिहास इवाभाति प्रशंसनमिदं द्विजाः॥१८॥ रावणो हि दु
राचारः सत्यमेतन्न संशयः॥ दशभिर्वदनैर्वीरो जगदुद्वेजको हि सः॥१९॥ दशास्यस्य वधो विप्रा न प्रशंसा
मिहार्हति॥ एतच्छ्रुत्वा तु मुनयो विस्मयं परमं गताः॥२०॥ किमेतदिति होचुस्ते परस्परमुखेक्षणाः॥ अयो
निसंभवा सीता काकुत्स्थकुलमाश्रिता॥२१॥ अस्मानपि जहासेयं किमेतन्नैव विद्महे॥ तच्छ्रुत्वा वचनं
तेषां मुनीनां भावितात्मनां॥२२॥ सीता भीता प्रणम्योचे कृतांजलिपुटा सती॥ पृथग्जनेव[1] मुनयो नाह
मनृतभाषिणी॥२३॥ यदि वाज्ञापयथ्य मां तदा वक्ष्यामि चादितः॥ अगस्त्यप्रमुखा विप्राः सीताया विनया
न्वितं॥२४॥ आकर्ण्य वचनं प्रीताः प्रोचुस्ते कथ्यतामिति॥ ततः सीता महाभागा प्रवक्तुमुपचक्रमे॥२५॥

[1] पामरइव संधिरार्षः

पतिंमुनीन्देवरांश्चमंत्रिणःश्रेणिमुख्यकान्॥विनयेनाभ्यनुज्ञाप्यपूर्ववृत्तांतमादरात्॥२६॥पूर्वंविवाहा।
न्मुनयोयदासंपितृमंदिरे॥तदैकोतिथिरूपेणब्राह्मणःसमुपागतः॥२७॥आगत्यपितरंमह्यंतमुवाचद्वि
जोत्तमः॥चतुरोवार्षिकान्मासान्स्थास्यामितवमंदिरे॥२८॥यदिसेवापरोनित्यंभवस्यमरसन्निभः॥जन
कोमत्पितादेवद्विजभक्तिपरायणः॥२९॥ब्राह्मणंवासयामासनानाभक्ष्यंसमादिशत्॥अहंचतस्यसे
वायैनियुक्ताधर्मभीरुणा॥३०॥यदायथाज्ञापयतिद्विजःसपरमार्थवित्॥तथाह्यकरवंतत्ररात्रिंदिवमतं
द्रिता॥३१॥नानातीर्थाभिगमनंकृतंतेनमहात्मना॥तत्रत्याश्चकथाश्चित्राःश्रावयामासमांद्विजः॥३२॥
सेवयाममधैर्येणचानुकूल्येनतर्पितः॥कदाचिद्ब्राह्मणश्रेष्ठःप्रियभाषीयदात्यमां॥३३॥तदोहमभिधा
स्यामिशृणुतद्विजपुंगवाः॥एकदाप्रातरुत्थायकृतमैत्रःकृतान्हिकः॥३४॥सीतेइतिसमाभाष्यप्रवक्तुमु
पचक्रमे॥शृणुसीतेमयादृष्टमाश्चर्यंकमलानने॥३५॥दधिमंडोदकाब्धेश्चपरःस्वादूदकोब्धिकः॥पु
ष्करद्वीपमावृत्यवर्ततेवलयाकृतिः॥३६॥पुष्करंपुष्करेदृष्टंमहावन्हिशिखोज्ज्वलं॥पत्रायुतायुतयुतं
ब्रह्मणःपरमासनं॥३७॥तद्द्वीपवर्षयोर्मध्येमानसोत्तरसंज्ञकः॥मर्यादापर्वतोदैर्घ्येचायामेऽयुतयोजनः॥३८

अ० तच्छैलस्यचतुर्दिक्षुइंद्रादीनांपुराणिहि॥ क्रीडार्थंनिर्मितान्येषांमहांतिविश्वकर्मणा॥ ३९॥ सुमालीराक्षसश्रेष्ठः
द्भु० कैकसीनामतत्सुता॥ मुनेर्विश्रवसःपत्नीसासूतरावणद्वयं॥ ४०॥ एकःसहस्रवदनोद्वितीयोदशवक्त्रकः॥
जन्मकालेसुरैरुक्तमाकाशेरावणद्वयं॥ ४१॥ लोकानांरावणाज्ज्ञातंनामयौगिकमेतयोः॥ कनिष्ठोदशकंठोयं
३१ शितिकंठप्रसादतः॥ ४२॥ लंकामधिवसत्येषधनदेनविनिर्मितां॥ ब्रह्मणोवरदानेनत्रिलोकीमवमन्यते॥
४३॥ श्रेष्ठःसहस्रवदनोरावणोलोकरावणः॥ स्वाभाविकबलेनासौपुष्करद्वीपमाश्रितः॥ ४४॥ सूर्याचंद्रम
सौगृह्यक्रीडेत्कंदुकलीलया॥ कुलाचलान्समुद्धृत्यकंदुकंक्रीडतेहिसः॥ ४५॥ मानसोत्तरशैलेस्यचतुर्दिक्षु
पुराणिहि॥ आच्छिद्यसंगृहीतानिदिगीशानांमहात्मनां॥ ४६॥ तत्रैवरमतेराजामातामहकुलैःसह॥ तत्रैंद्री
यापुरीरम्यासस्वयंतत्रतिष्ठति॥ ४७॥ अन्यान्यन्येभ्यएवादान्मंत्रिभ्योराक्षसाधिपः॥ विशेषतोलंकृतासापु
रीपरमदुर्लभा॥ ४८॥ जगतांसारमाकृष्ययथास्थानंसुमंडिता॥ चंपकाशोकमंदारकदलीप्रियकार्जुनैः॥ ४९॥
पाटलाशोकजंबूभिःकोविदारैश्चचंदनैः॥ पनसैःसालतालैश्चतमालैर्देवदारुभिः॥ ५०॥ बकुलैःपारिजातैश्च रा०
कल्पवृक्षैरलंकृता॥ अन्यैश्चविविधैर्वृक्षैःसर्वर्तुकुसुमोज्ज्वलैः॥ ५१॥ दिव्यगंधरसैर्दिव्यैःसर्वर्तुफलसं ३१

युतैः॥भ्रमरैः कोकिलैर्नानावर्णपक्षिभिरुज्ज्वला॥५२॥शातकौंभमयैः कैश्चित् कैश्चिदग्निशिखोपमैः॥नी
लांजननिभैश्चान्यैः शोभितावरपादपैः॥५३॥दीर्घिकाः संतिबह्व्योत्र जलपूर्णामहोदयाः॥महार्हमणिसो
पानाः स्फाटिकांतरकुट्टिमाः॥५४॥फुल्लपद्मोत्पलवनाश्चक्रवाकोपशोभिताः॥दात्यूहगणसंघुष्टाहंससार
सनादिताः॥५५॥तत्र तत्रावनेर्देशा वैडूर्यमणिसन्निभाः॥शाद्वलैः परमोपेताः सुखार्थमुपकल्पिताः॥५६॥
सर्वर्तुसुखदा रम्याः पुंस्कोकिलकलारवाः॥येच स्थानंदने तिष्ठंते येच चैत्ररथे स्थिताः ५७॥मंदरेन्येषु शैलेषु
तेच स्थास्तत्र संस्थिताः॥नानामणिमयीभूमिर्मुक्ताजालमयी तथा॥५८॥विचित्रबहुसोपानप्रासादैरुपशोभिता
॥पुरहस्तसमाकीर्णा पुरी परमशोभना॥५९॥न देवैरनुभूयेत स्वर्गिभिर्नानुभूयते॥तत्पुरी स्थितिमाकांक्ष्य तपः कु
र्वंति सत्तमाः॥६०॥तस्यां सहस्रवदनो रावणो राक्षसाधिपः॥आस्ते जगद्वशीकृत्य हेलया बाहुलीलया॥६१॥इं
द्रादींस्त्रिदशान् सर्वान् गलेवध्वास किन्नरान्॥गंधर्वान् दानवान् भीमान् सर्वान् विद्याधरांस्तथा॥६२॥बालक्री
डनया क्रीडन्मेरुं मन्येत सर्षपं॥गोष्पदं मन्यते चाब्धिं सर्वलोकांस्तृणोपमान्॥६३॥द्वीपान् लोष्टसमान् वीरो न
किंचिद्गणयन्दृशा॥सयदा सर्वलोकानां त्रासनं समुपारभत्॥६४॥तदा पितामहोभ्येत्य पुलस्त्यो विश्र॥

वास्तथा॥न्यवारयन्यत्नतस्तंतातवत्सेतिभाषकाः॥६५॥एवंसरावणोदेविसहस्रवदनोमहान्॥पुष्करद्वी
पमासाद्यवर्ततेजनकात्मजे॥तस्यानुजोदशास्योयंलंकायांजानकिस्थितः॥६६॥चित्राणीत्यादीनिमेशं
सयित्वाविप्रोमासांश्चतुरोयापयित्वा॥राजानंमांचाशिषायोजयित्वाजगामैकःप्रोषितस्तीर्थयात्रां॥६७॥
॥ इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेसीताभाषणंनामसप्तदशःसर्गः ॥
॥ १७ ॥ ॥एवंसरावणोविप्राःसहस्रवदनोमहान्॥प्रोक्तस्तेनद्विजेनाहंश्रुत्वाश्चर्यंचविस्मिता॥१॥अद्यापि
तन्ममहृदिजागरूकंहिवर्तते॥पसामेबाहुवीर्येणदशास्योरावणोहतः॥२॥सानुगःससुतामात्यःसभ्रातृकः
सबांधवः॥मत्कृतेचपुरीदग्धासेतुर्बद्धश्चवारिधौ॥३॥सुग्रीवेणसहायेनतथाहनुमदादिना॥इदंलोकोत्त
रंकर्मकृतंलोकहितंमहत्॥४॥तथापिहृदिमेनैतदाश्चर्यंप्रतिभातिहि॥यदितस्यवधंकुर्याद्रावणस्यदुरात्म
नः॥५॥तदासंभाव्यतेकीर्त्तिर्जगत्स्वास्थ्यमवाप्नुयात्॥अतोमेहसितंविप्राःक्षमध्वंज्वलनोपमाः॥६॥आक
र्ण्यमुनयःसर्वेसाधुसाध्वितिवादिनः॥जानकींप्रशशंसुस्तेसर्वलोकहितैषिणीं॥७॥राघवोवचनंश्रुत्वासीता
यावीर्यवर्धनं॥सिंहनादंविनद्योच्चैःसर्वानाज्ञापयत्प्रभुः॥८॥मुनयोद्यैवगंतव्यंरावणस्यजयायवै॥लक्ष्म

णंभरतंचैवशत्रुघ्नंचादिशत्प्रभुः॥९॥मित्रसुग्रीवदेहेराजन्नुसर्वेजांबवदादयः॥गच्छामःसहितास्तत्रसैनिकैःस
हमंत्रिभिः॥१०॥इत्याज्ञाप्यमहाबाहुःसस्मारपुष्पकंरथं॥स्मरणादागतस्तत्रपुष्पकोरथसत्तमः॥११॥तत्रारु
ह्यन्महावीरारामचंद्रपुरोगमाः॥भरतोलक्ष्मणश्चैवशत्रुघ्नश्चामितद्युतिः॥१२॥सुग्रीवप्रमुखाःसर्वेवानरा
जितकाशिनः॥विभीषणोमहाबाहुःसहरक्षोगणैःप्रभुः॥१३॥मात्रापित्राप्यकथनादजानन्नबोधितोऽन्यथा॥
सीतयारामकार्यार्थंनिर्ययौराघवाज्ञया॥१४॥सुमंत्राद्यामंत्रिणश्चऋषयोस्तेचनिर्ययुः॥नानाशस्त्रप्रहरणा
धृतायुधकलापिनः॥१५॥मुमुचुस्तेसिंहनादंमहाघोरंमहाबलाः॥धनुःशब्देनरामस्यसिंहनादेनचैवहि॥
१६॥चचालवसुधाशैलाश्चेलुःपेतुर्महास्वनात्॥नद्योऽशुष्यन्समुद्वेलाःसागराश्चचकंपिरे॥१७॥सुग्रीवोह
नुमान्नीलोजांबवान्नलएवच॥ग्रसंतइवतेसर्वेनिर्ययूरामशासनात्॥१८॥सत्तयासीतयासार्धंरामचंद्रोमहाब
लः॥कामगंपुष्पकंदिव्यमारुरोहधनुर्धरः॥१९॥पुष्पकंतेसमारुह्यसर्वएवमहाबलाः॥सीतयाभ्रातृभिः
सार्द्धंरामचंद्रंमहाबलाः॥२०॥प्रोत्साहयंतोवचनैर्निर्ययुर्जितकाशिनः॥रामाज्ञयापुष्पकंतदाकाशपथमाश्रि
तं॥२१॥मनोमारुतवेगेनक्षणेनगरुडोयथा॥जगामपुष्करद्वीपंयत्रास्तेमानसोत्तरः॥२२॥मानसोत्तरमासाद्य

विस्मितास्तेमहाबलाः॥ किंचित्रंकिंचित्रमितिप्रोचुराश्चर्यलक्षणाः॥ २३॥ राघवोभ्रातृभिःसार्द्धंसहवानरपुंग
वैः॥ सिंहनादंननादोच्चैर्धनुश्चापिव्यकर्षयत्॥ २४॥ सशब्दस्तुमुलोभूत्वापृथिवींचांतरिक्षकं॥ पातालवि
वरांश्चैवपूरयामाससर्वतः॥ २५॥ रावणःसहसोत्तस्थौकिमेतदितिसंवदन्॥ तत्रान्येराक्षसाःक्रुद्धाःसर्वएव
विनिर्ययुः॥ २६॥ अहोकुतःस्विच्छब्दोयंसाधुसर्वैर्निरूप्यतां॥ इत्याभाष्यराक्षसेंद्रोराक्षसेंद्रैर्महाबलैः॥
२७॥ नगरान्निर्ययौशीघ्रंसंदष्टौष्ठपुटोबली॥ द्वादशादित्यसंकाशःसहस्रवदनोमहान्॥ २८॥ द्विसहस्रभुजो
द्रिक्तोद्विसहस्रविलोचनः॥ महामेघसमध्वानोवडवाग्निसमःक्रुधा॥ २९॥ शतयोजनविस्तीर्णेरथेसूर्यसमत्विषि
॥ नानायुधानिसंगृह्यपरिघप्रासतोमरान्॥ ३०॥ भुशुंडीःपरशून्घंटालौहमुद्गरचक्रकं॥ पाशांश्चविविधान्गृ
ह्यबाणान्कर्मारमार्जितान्॥ ३१॥ विपाठान्क्षुरधारांश्चअर्धचन्द्राकृतीनपि॥ नानायुधसहस्राणिनानावि
धधनूंषिच॥ ३२॥ प्रगृह्यसहसाप्रायाद्यत्ररामोधनुर्धरः॥ लोचनैःक्रोधसंदीप्तैरुल्काभिरिवदीपितः॥ ३३
कोयमित्यब्रवीत्क्रोधादनलंप्रोद्वमन्निव॥ सिंहनादंममपुरेरिपुस्त्वाद्विससर्जह॥ ३४॥ ममापिरिपुरस्तीतिदुर्य
शःसमुपस्थितं॥ इंद्राद्याःककुभांनाथाभृत्याःप्राणपरीप्सया॥ ३५॥ पातालविवरेस्वर्गेस्वर्गेपातालमेककं॥ ३

करोमिसहस्रैवाहंमानवानांतथैकतां॥३६॥मेरुप्रभृतिशैलांश्चचूर्णयाम्यणुसंख्यया॥देवलोकंनृणांकुर्यांनृ
लोकंत्रिदिवौकसां॥३७॥उद्धरयपृथिवींछिंद्यामनंतंनखराग्रकैः॥ब्रह्मामांवारयामासस्सांत्वयन्प्रियभाषितैः॥
३८॥अन्यथाराक्षसमृतेनारक्षंजगतीतले॥स्थावंद्रुमसौभूत्वातिष्ठिप्रणयनंत्वहं॥३९॥बलाहकत्वमिंद्रत्वं
पृथ्वीसेकादिकाःक्रियाः॥कुर्यामपित्वंवह्नित्वंवरुणत्वंधनेशतां॥४०॥इत्येवंबहुधागर्जन्नाजगामांतिकंह
रेः॥सेनाध्यक्षाराक्षसेंद्राराक्षसाईसमागताः॥४१॥नानाप्रहरणोपेतानानारथपदातिनः॥एकैकस्यापिप
र्याप्ताजगतीनेतिमन्महे॥४२॥केषांचिदपिनामानिभारद्वाजनिबोधमे॥कोटीशोमनसःपूर्णःशालःपालोहली
मुखः॥४३॥पिच्छलःकौणपश्चकःकालवेगप्रकालकः॥हिरण्यबाहुःशरणःकस्सकःकालदंतकः॥४४॥
पुच्छांडकोमंडलकःपिंडसेत्कारभेणकः॥उच्छिखःकरभोभद्रोविश्वजेताविरोहणः॥४५॥शिलीपालकरोमू
कःसुकुमारःप्रेषणः॥सुहूरःशशरोमाचसुरोमाचमहाहनुः॥४६॥पारावतःपारियात्रःपांडुरोहरिणःकृशः॥
विहंगःशरभोदक्षःप्रमोदःसहतापनः॥४७॥क्रकरःकुडरोवेणीवेणीस्कंधःकुमारकः॥बाहुकःशंखवेगश्च
धूर्तकःपातपातकौ॥४८॥शंकुकर्णःपिटरकःकुटीरमुखसेचकौ॥पूर्णांगदःपूर्णमुखःप्रभाषःशकुलिर्हरिः॥४९

अ० अमाहिठःकामठकःसुषेणोमानसोव्ययः॥भैरवोमुंडदेवांगःपिशंगश्चोडपालकः॥५०॥ऋषभोवेगवान्नामपिं
हु० डारकमहाहनू॥रक्तांगःसर्वसारंगःसमुद्रःपाट्वासकौ॥५१॥वराहकोरावणकःसुचित्रश्चित्रवेगिकः॥परा
३४ शरस्तरुणिकोमणिस्कंधस्तथारुणिः॥५२॥सेनाध्यक्षामहाब्रह्मन्कीर्तिताःकीर्तिवर्धनाः॥प्राधान्येनबहु
त्वात्तुनसर्वेपरिकीर्तिताः॥५३॥नशक्याःपरिसंख्यातुंयेयुद्धायसमागताः॥नीलरक्तासिताघोरामहाकाया
महाबलाः॥५४॥सप्तशीर्षाद्विशीर्षाश्चपंचशीर्षास्तथापरे॥कालानलमहाघोराहुताश समविग्रहाः॥५५॥
महाकायामहावेगाःशैलशृंगसमुच्छ्रयाः॥योजनायामविस्तीर्णाद्वियोजनसमुच्छ्रयाः॥५६॥कामरूपाःका
मबलादीप्तानलसमत्विषः॥अन्येचबहवःशूराःशूलपट्टिशधारिणः॥५७॥दिव्यप्रहरणोपेतानानावेषविभू
षिताः॥शृणुनामानिचान्येषांयेन्येरावणसैनिकाः॥५८॥शंकुकर्णोनिकुंभश्चपद्मःकुमुदएवच॥अनंतोद्वादश
भुजस्तथाकृष्णोपकृष्णकौ॥५९॥घ्राण श्रवाःकपिस्कंधःकांचनाक्षोजलंधमः॥अक्षसंतर्जनोब्रह्मन्कुनदी
कस्तमोभ्रकृत्॥६०॥एकाक्षोद्वादशाक्षश्चतथैवैकजराभिधः॥सहस्रबाहुर्विकटोव्याघ्राख्यःक्षितिकंपनः ग०
॥६१॥पुण्यनामासुनामाचसुवक्त्रःप्रियदर्शनः॥परिश्रितःकोकनदःप्रियमाल्यानुलेपनः॥६२॥अजोदरोग ३४

ज शिराः स्कंधाक्षः प्रातलोचनः ॥ ज्वालाजिह्वः करालश्च सितकेशो जटी हरिः ॥ ६३ ॥ चतुर्दंष्ट्रोष्ठजिह्वश्च मेघनादः
पृथुश्रवाः ॥ विकृतास्यो धनुर्वक्त्रो जाठरो मारुताशनः ॥ ६४ ॥ उदराक्षो रथाक्षश्च वज्रनाभो वसुप्रभः ॥ समुद्रवेगो
विप्रेंद्र शैलकंपी तथैव च ॥ वृषमेषप्रवाहश्च तथा नंदोपनंदकौ ॥ धूम्रः श्वेतः कलिंगश्च सिद्धार्थो वरदस्तथा ॥
॥ ६६ ॥ प्रियकश्चैकनंदश्च बहुवीर्यः प्रतापवान् ॥ आनंदश्च प्रमोदश्च स्वस्तिको ध्रुवकस्तथा ॥ ६७ ॥ क्षेमबाहुः सु
बाहुश्च सिद्धपात्रश्च सुव्रतः ॥ गोव्रजः कनकापीडो महापारिषदेश्वरः ॥ ६८ गायनो दमनश्चैव बाणः खड्गश्च वी
र्यवान् ॥ वैताली गतितालीच तथा कथकवार्त्तिकौ ॥ ६९ ॥ हंसजः पंकदिग्धांगः समुद्रोन्मादनश्च ह ॥ रणोत्क
टः प्रहासश्च श्वेतसिद्धश्च नंदकः ॥ ७० ॥ एते पुरा रावणसैन्यपाला नानायुधप्राहरणा रणेषु ॥ हंसेषु मेषेषु वृ
षेषु[१] वीरा रामं प्रतस्थुः कृतसिंहनादाः ॥ ७१ ॥ ॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अद्भुतो
त्तरकांडे रावणसैन्यनिर्याणं नामाष्टादशः सर्गः ॥ १८ ॥ ॥ रावणस्यौरसाः पुत्राः सहस्रास्सप्तपुंगवैः ॥ नानाप्रह
रणोपेता दुद्रुवुश्चाघवं रणे ॥ १ ॥ नामान्येषां प्रवक्ष्यामि भारद्वाज शृणुष्व मे ॥ कालकंठः प्रभाषश्च तथा कुंभांडकोपरः
॥ २ ॥ कालकक्षः शितश्चैव भूतलोन्मथनस्तथा ॥ यज्ञबाहुः प्रबाहुश्च देवयाजी च सोमपः ॥ ३ ॥ मज्जालश्च महाते

---

१ आरूढा इति शेषः ॥

अ० जाःक्रथःक्राथोवसुव्रतः॥तुहरश्चतुहारश्चचित्रदेवश्चवीर्यवान्॥४॥मधुरःसुप्रसादश्चकिरीटश्चमहाबलः॥वस
दु० नोमधुवर्णश्चकलशोदरएवच॥५॥धर्मदोमन्मथकरःसूचीवक्त्रश्चवीर्यवान्॥श्वेतवक्त्रःसुवक्त्रश्चचारुवक्त्रश्च
३५ पांडुरः॥६॥दंडवाहुःसुवाहुश्चरजःकोकिलकस्तथा॥अचलःकालकाक्षश्चबालेशोबालभक्षकः॥७॥संचा
नकःकोकनदोगृध्रपत्रश्चजंबुकः॥लोहाजवक्त्रोजवनःकुंभवक्त्रश्चकुंभकः॥८॥मुंडग्रीवश्चकृष्णौजाहंसव
क्त्रश्चकुंजरः॥एतेरावणपुत्राश्चमहावीर्यपराक्रमाः॥९॥बाहुशब्दैःसिंहनादैःपूरयंतोदिशोदश॥एषांसैन्यसह
स्राणांसहस्राण्यर्बुदानिच॥१०॥नानाकृतिवयोरूपावि विधायुधपाणयः॥कूर्मकुक्कुटवक्त्राश्चसर्पजंभ
कवक्त्रकाः॥११॥गोमायुमुखवक्त्राश्चशशोलूकमुखास्तथा॥खरोष्ट्रवदनाश्चैववराहवदनास्तथा॥१२॥म
नुष्यमेषवक्त्राश्चशृगालवदनास्तथा॥मार्जारप्राशवक्त्राश्चदीर्घवक्त्राश्चकेचन॥१३॥नकुलोलूकवक्त्रा
श्चकाकवक्त्रास्तथापरे॥आखुबभ्रुकवक्त्राश्चमयूरवदनास्तथा॥१४॥मत्स्यमेषाननाश्चैवअजाविमहि
षाननाः॥ऋक्षशार्दूलवक्त्राश्चद्वीपिसिंहाननास्तथा॥१५॥भीमागजाननाश्चैवतथानक्रमुखास्तथा॥गो रा०
खरोष्ट्रमुखाश्चान्येहृषदंशमुखास्तथा॥१६॥महाजठरपादांगास्तवकाक्षाश्चदुर्मुखाः॥पारावतमुखा ३५

श्चान्ये तथा हृष्टमुखाः परे ॥१७॥ कोकिलाभाननाश्चान्ये श्येनतित्तिरिकाननाः ॥ कृकलासमुखाश्चैव विरजोंबरधारिणः ॥१८॥ व्यालवक्त्राः शुकमुखाश्चंडवक्त्राः शुभाननाः ॥ आशीविषाश्चीरधरा गोनासावरणास्तथा ॥१९॥ स्थूलोदराः कृशांगाश्च स्थूलांगाश्च कृशोदराः ॥ ह्रस्वग्रीवा महाकर्णा नानाव्यालविभूषणाः ॥२०॥ गजेंद्रचर्मवसनास्तथा कृष्णाजिनांबराः ॥ स्कंधेमुखा द्विजश्रेष्ठ तथा ह्युदरतोमुखः ॥२१॥ पृष्ठेमुखो हनुमुखास्तथा जंघामुखास्तथा ॥ पार्श्वाननाश्च बहवो नानादेशमुखास्तथा ॥२२॥ तथा कीटपतंगानां सदृशास्या महाबलाः ॥ नानाव्यालमुखाश्चान्ये बहुबाहुशिरोधराः ॥२३॥ नानावृक्षभुजाः केचिद्भुजंगवदनाः परे ॥ खड्गमुखा वृकमुखा अपरे गरुडाननाः ॥२४॥ चीरसंवृतगात्राश्च नानाफलकवाससः ॥ नानावेषधराश्चान्ये नानामाल्यानुलेपनाः ॥२५॥ नानावस्त्रधराश्चान्ये चर्मवाससएव च ॥ उष्णीषिणो मुकुटिनः कंबुग्रीवाः सुवर्चसः ॥२६॥ किरीटिनः पंचशिखास्तथा कठिनमूर्द्धजाः ॥ त्रिशिखा द्विशिखाश्चैव तथा सप्तशिखा अपि ॥२७॥ शिखंडिनोऽमुकुटिनो मुंडाश्च जटिलास्तथा ॥ चित्रमालाधराः[1] केचित्केचिद्रोमाननास्तथा ॥२८॥ विग्रहैकवशा नित्यमजेयाः सुरसत्तमैः ॥ कृष्णा निर्मांसवक्त्राश्च दीर्घपृष्ठा[2] निरूदराः ॥२९॥ दीर्घपृष्ठाः स्थूलपृष्ठाः प्रलंबोदरमेहनाः ॥ महाभुजा ह्रस्वभुजा ह्र

१ विग्रहो युद्धं २ दीर्घस्त्व मार्ष ॥

स्वगात्राश्च वामनाः ॥ ३० ॥ कुब्जाश्च ह्रस्वजंघाश्च हस्तिकर्णशिरोधराः ॥ हस्तिनासाः कूर्मनासा वृकनासास्तथापरे
॥ ३१ ॥ वारणेंद्रनिभाश्चान्ये दीप्तिमंतः स्वलंकृताः ॥ पिंगाक्षाः शंकुकर्णाश्च वक्रनासास्तथा परे ॥ ३२ ॥ पृथुदंष्ट्रा
महादंष्ट्राः स्थूलोष्ठा हरिमूर्द्धजाः ॥ नानापदैष्ठदंष्ट्राश्च नानाहस्तशिरोधराः ॥ ३३ ॥ नानाचर्मभिराच्छन्ना नाना
वासाश्च सुव्रत ॥ हृष्टाः परिपतंति स्म महापरिघवाहवः ॥ ३४ ॥ दीर्घग्रीवा दीर्घनखा दीर्घपादशिरोभुजाः ॥ पिंगा
क्षा नीलकंठाश्च स्वर्णकर्णाश्च सुव्रत ॥ ३५ ॥ वृकोदरनिभाः केचित्केचिदंजनसंनिभाः ॥ श्वेताक्षा लोहितग्रीवाः ।
पिंगाक्षाश्च तथापरे ॥ ३६ ॥ कल्माषा बहवो विप्र चित्रवर्णाश्च केचन ॥ चामरापीडकनिभाः श्वेतलोहितकांतयः
॥ ३७ ॥ नानावर्णाः सुवर्णाश्च मयूरसदृशप्रभाः ॥ पाशोद्यतकराः केचिद्व्यादितास्याः खरानना ॥ ३८ ॥ शतघ्नीच
क्रहस्ताश्च तथा मुसलपाणयः ॥ असिमुद्गरहस्ताश्च दंडहस्ताश्च केचन ॥ ३९ ॥ गदाभुशुंडिहस्ताश्च तथा तो
मरपाणयः ॥ आयुधैर्विविधैर्घोरैर्महात्मानो महौजसः ॥ ४० ॥ महाबला महावेगा असंख्याता विनिर्ययुः ॥ घं
टाजालपिनद्धांगा ननृतुस्ते[1] रणाजिरे ॥ ४१ ॥ कोटिशो विद्रुततरूक्षभाषिणो यातुधानगणसैन्यपालकाः ॥ दु
द्रुवू रघुकुलावतंसकं गृह्ण धावहनपोथवादिनः ॥ ४२ ॥ ॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिका

[1] आर्षमेतत्

ये अद्भुतोत्तरकांडे रावणपुत्रनिर्याणंनामएकोनविंशः सर्गः॥१९॥ ॥धनूंषिचविधुन्वानस्ततोवैश्रवणानुजः
॥कोयंकिमर्थमायातइतिचिंतापरोभवत्॥१॥ततोगगनसंभूतावाणीसमुपपद्यत॥भोरावणमहावीर्यरामोयंसमु।
पागतः॥२॥राघवोयमयोध्यायाराजाधर्मस्वरूपधृक्॥लंकायांनिहतोयेनदाराकर्षीतवानुजः॥३॥त्वद्वधार्थमि
हायातोविभीषणवसुप्रदः॥भ्रातृभिर्वानरैर्ऋक्षैराक्षसैर्मानुषैर्युतः॥४॥श्रुत्वाह्यमानुषंवाक्यंरावणोलोकरावणः॥
क्रोधमाहारयामास द्विगुणंमुनिपुंगव॥५॥हन्यतांवध्यतामेषमानुषोरिपुसंज्ञितः॥ममविश्वजितःसाक्षाद्रणाय
समुपस्थितः॥६॥इत्युक्त्वाबाणजालानिचक्रपर्वततोमरान्॥चिक्षेपसहसारक्षःपुष्पकोपरिसुव्रत ॥७॥राक्ष
सीसाचमूर्घोरावानरानृक्षमानुषान्॥चखादकांश्चित्परान्योधयामासदर्पितान्॥८॥साचशाखामृगीसेनाराघव
स्यचमानुषी॥रावणस्यानुगान्वीरान्जघानबाणपर्वतैः॥९॥तेन्योन्यंवधमिच्छंतोयुयुधुःसैनिकोत्तमाः॥पेतु
र्मम्लुश्चमुमुहूराक्षसावानरानराः॥१०॥ततोरामोमहाबाहुर्भरतोलक्ष्मणस्तथा॥शत्रुघ्नोहनुमान्वीरःसुग्रीवोजां
बवांस्तथा॥११॥अन्येचनलनीलाद्याविभीषणपुरोगमाः॥युयुधुस्तेमहाघोरंमहाघोरेरणाजिरे॥१२॥निर्जघ्नु
श्चविनेदुश्चचिक्रीडुश्चैवराक्षसाः॥जहृषुश्च महात्मानःसंग्रामेष्वनिवर्तिनः ॥१३॥उत्कृष्टास्फोटितैर्नादैश्चचालेव

चमेदिनी॥रक्षसांसिंहनादैश्चपरिपूर्णंनभस्तलं॥१४॥तेप्रायुध्यंतमुदिताराक्षसेंद्रामहाबलाः॥प्रपयुर्वानरानीकंसमुद्यतशिलायुधं॥१५॥युयोधराक्षसंसैन्यंनरराक्षसवानरैः॥हस्त्यश्वरथसंबाधंकिंकिणीशतनादितं॥१६॥नीलजीमूतसंकाशैःसमुद्यतशिलायुधैः॥दीप्तानलरविप्रख्यैर्नैर्ऋतैःसर्वतोवृतं॥१७॥तद्वीक्ष्यराक्षसबलंसंरब्धाश्चप्लवंगमाः॥क्रुद्धंतद्राक्षसंसैन्यंजघ्नुर्द्रुमशिलायुधैः॥१८॥तेपादपशिलाशैलैस्तांचक्रुर्वृष्टिमुत्तमां॥वृक्षौघैर्वज्रसंकाशैर्हरयोभीमविक्रमाः॥१९॥शिखरैःशिखराभांस्तेयातुधानानमर्दयन्॥निर्जघ्नुःसमरेक्रुद्धाहरयोराक्षसर्षभान्॥२०॥केचिद्रथगतान्वीरान्गजवाजिस्थितानपि॥निर्जघ्नुःसहसाप्लुत्ययातुधानाःप्लवंगमाः॥२१॥शैलशृंगनिभास्तेतु[1]मुष्टिनिष्क्रांतलोचनाः॥[2]वेपुःपेतुश्चनेदुश्चततोराक्षसपुंगवाः॥२२॥ततःशूलैश्चवज्रैश्चविमुष्टैर्हरिपुंगवैः॥मुहूर्तेनावृताभूमिरभवच्छोणितप्लुता॥२३॥विकीर्णैःपर्वताग्रैश्चरक्षोभिरुपमर्दितैः॥आक्षिप्ताःक्षिप्यमाणाश्चभग्नशेषाश्चवानराः॥२४॥रथेनरथिनंचापिराक्षसंराक्षसेनच॥हयेनचहयंकेचित्पिपिषुर्धरणीतले॥२५॥वानरान्वानरैरेवजघ्नुर्घोराहिराक्षसाः॥राक्षसान्राक्षसैरेवपिपिषुर्वानरायुधि॥२६॥आक्षिप्यचशिलाजघ्नूराक्षसावानरांस्तथा॥तेषामाच्छिद्यशस्त्राणि

[1] मुष्टिप्रहारेण निष्क्रांतलोचनाः [2] आर्षं

जघ्नुस्तानपिवानराः॥२७॥निर्जघ्नुःशैलशिखरैर्विभिन्नाश्चपरस्परं॥सिंहनादंविनेदुश्चरणेवानरराक्षसाः॥२८
छिन्नवर्मतनुत्राणाराक्षसावानरैःकृताः॥सुस्रावरुधिरंतेभ्यःस्रवतःपर्वतादिव॥२९॥तस्मिंस्तदासंयतिसं
प्रवृत्तेकोलाहलेराक्षसराजधान्यां॥संहृष्यमाणेषुचवानरेषुनिपात्यमानेषुचराक्षसेषु॥३०॥प्रभज्यमानेषु
महाबलेषुमहर्षयोभूतगणाश्चनेदुः॥तेनापिसर्वेहरयःप्रहृष्टाविनेदुराश्वेडितसिंहनादैः॥३१॥ :०: ॥६
॥ इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेसंकुलयुद्धंनामविंशतितमःसर्गः॥२०॥
॥ ॥ततोरथंमारुततुल्यवेगमारुह्यशक्तिंनिशितांप्रगृह्य॥सरावणोरामबलंमहर्षंविवेशमीनोहियथा
र्णवौघं॥१॥सवानरान्हीनबलान्निरीक्ष्यप्राणेनदीप्तेनरराजराजा॥एकक्षणेनेंद्ररिपुर्महात्मानिहंतुमै
च्छन्नरवानरांश्च॥२॥मनसाचिंतयामाससहस्रकंधरःस्वराट्॥एतेक्षुद्राःसमायाताःप्राणांस्त्यक्त्वाधना
निच॥३॥द्वीपांतरंमहत्प्राप्यममयुद्धाभिकांक्षिणः॥किंस्यान्ममहतैःक्षुद्रैर्नराक्षसवानरैः॥४॥यस्माद्देशा
त्समायातास्तंदेशंप्रापयाम्यहं॥क्षुद्रकेषुशराघातंनप्रशंसंतिपंडिताः॥५॥इतिसंचिंत्यधनुषावायव्या
स्त्रंसुयोजह॥तेनास्त्रेणनराऋक्षावानरराक्षसाहिते॥६॥यस्माद्यस्मात्समायातास्तंतंदेशंप्रयापिताः॥

१ उपमावाक्येआर्षमेकवचनं ॥

गलहस्तिकयाविप्रचोरान्राजभटाइव॥७॥तेसर्वेस्वगृहंप्राप्ताअस्त्रवेगेनविस्मिताः॥क्वस्थिताःक्वसमाया
[1]तामन्यतस्वप्नएववैतेः॥८॥प्रलयानिलवेगेनअस्त्रेणवंचिताभृशं॥भरतोलक्ष्मणश्चापिशत्रुघ्नोहनुमांस्तथा
॥९॥सुग्रीवनलनीलाद्याहरयोनिलरंहसः॥विभीषणपुरोगाश्चराक्षसाःक्रूरविक्रमाः॥१०॥वानराश्चनराऋ
क्षाराक्षसाअक्षतागृहं॥प्राप्यातिविस्मिताःसर्वेप्रोचंतेराममेवहि॥११॥पुष्करेपुष्पकेतिष्ठन्नुससीतोरा
घवःपरं॥आस्तेस्मनास्त्रवेगोयंरामंचालयितुंक्षमः॥१२॥महर्षयोपितत्रासन्किमेतदितिविस्मिताः॥सा
पिसीतामहाभागातत्रास्तेस्मशुचिस्मिता॥१३॥गंधर्वनगराकारंदृष्ट्वारामबलंमहत्॥स्वस्तीतिवादिनःसौ
म्यशांतिंजेपुर्महर्षयः॥१४॥अंतरिक्षचराःसर्वेहाहाकारंप्रचक्रिरे॥देवाअग्निमुखाविप्रकिंकृतंरावणेन
हि॥१५॥गरुडस्थोयदाविष्णूरावणंहंतुमागतः॥लीलयालवणांभोधौक्षिप्तोविष्णुःसनातनः॥१६॥साट्ट
हासंविनद्योच्चैरक्षसावामपाणिना॥ततःप्रभृतिदेवाश्चगंधर्वाःकिन्नरानराः॥१७॥गंधमस्यनगृह्णंतिशा
र्दूलस्येवजंबुकाः॥सोयंविष्णुर्दशरथाज्जातोदेवःसनातनः॥१८॥अस्माकंभागधेयेनरामोजयतुरावणं॥
परस्परंसुराःसर्वेवदंतोंतर्हिताःस्थिताः॥१९॥ननर्दचसहस्रास्यःक्षुद्रंमत्वासराघवं॥विसिस्मियेचरामो

---

१ समायाताः अमन्यतेतिच्छेदः संधिरार्षः ॥

पितदृष्ट्वाकर्मदुष्करं॥२०॥क्रोधमाहारयामासरावणस्यवधंप्रति॥ततःकिलकिलाशब्दंचक्रूराक्षसपुंगवाः॥२१
सराघवःपद्मपलाशलोचनोजज्वालकोपेनद्विषज्जयेषणः॥रामंप्रधर्तुंनप्राशक्नमेदिनीचकंपिरेवारिधयोग्र
हाअपि॥२२॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेरामसैन्यविक्षेपणंनामएकविं
शतितमःसर्गः॥२१॥ ॥विनष्टंतंरिपुंदृष्ट्वारामःशत्रुनिवर्हणः॥जज्वालचसकोपेनरक्षसांसहजोरिपुः॥१॥ः
विचकर्षधनुःश्रेष्ठंप्रलयानलसन्निभं॥वेगेनबाणांश्चिक्षेपरक्षसांमर्मसुप्रभुः॥२॥तिलशःखंडयंतिस्मबा
णाराक्षसपुंगवान्॥कदाधनुषिसंधत्तेकदाविसृजतिप्रभुः॥३॥नांतरंददृशेकैश्चिच्छिन्नाःस्युरसःपरं॥ई
जघानराक्षसान्रामोरुद्रःपशुगणानिव॥४॥तदृष्ट्वादुष्करंकर्मकृतंरामेणरावणः॥अनीकाग्रंसमासाद्यसुयुधे
राघवेणहि॥५॥रेरेराक्षससेनान्यःप्रेक्षकाइवतिष्ठत॥अहमेकोहनिष्यामिनरमाकस्मिकंरिपुं॥६॥अद्यनि
र्मानवांपृथ्वींनिर्देवंत्रिदिवंतथा॥करिष्याम्यहमेवैकःशोषयिष्यामिवारिधीन्॥७॥पर्वतांश्चूर्णयिष्यामिपा
तयिष्यामिवैग्रहान्॥इत्युक्त्वाराक्षसश्रेष्ठोरामंयोद्धुमथाह्वयत॥८॥त्वामद्यखड्गेनाच्छिद्यतर्पयिष्यामि
चानुगान्॥नेयंलंकापुरीरामनाहंचदशकंधरः॥९॥शिरस्तेपोथयिष्यामिगदयारघुनंदन॥कपित्थमिव

काकुत्स्थकरीमदकलःकिल ॥१०॥इत्युक्त्वारावणोयुद्धंरामेणसहचारभत्॥तदभूद्द्वैरथंयुद्धंबलिवासवयो
रिव॥११॥रावणंप्राप्यरामोपिपरंहर्षमुपागमत्॥तदभूदद्भुतंयुद्धंद्वयोर्वैरोमहर्षणं॥१२॥एवमस्यचमहाबाहो
र्बलिनोरावणस्यच॥गांधर्वेणचगांधर्वंदैवंदैवेनराघवः॥१३॥अस्त्रंराक्षसराजस्यजघानपरमास्त्रवित्॥४
अस्त्रयुद्धेचपरमोरावणोराक्षसाधिपः॥१४॥ससर्जपरमक्रुद्धःपन्नगास्त्रंसराघवे॥तेरावणधनुर्मुक्ताःशराः
कांचनभूषिताः॥१५॥अभ्यवर्त्ततकाकुत्स्थंसर्पाभूत्वामहाविषाः॥तेसर्पवदनाघोरावमंतोज्वलनंमुखैः॥
॥१६॥राममेवाभ्यवर्त्ततव्यादितास्याभयावहाः॥तैर्वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः॥१७॥दिशश्चवि
दिशश्चैवसमंताद्दाहत्ताभृशं॥रामःसंपततोदृष्ट्वापन्नगांस्तान्सहस्रशः॥१८॥सौपर्णमस्त्रंतद्घोरंपुनःप्र
वर्तयद्रणे॥रामेणचशरामुक्तारुक्मपुंखाःशिलाशिताः॥१९॥सुपर्णाःकांचनाभूत्वाविचेरुःसर्पशत्रवः॥
तेतान्शत्रुशरान्जघ्नुःसर्परूपान्महाविषान्॥२०॥सुपर्णरूपारामस्यविशिखाःकामरूपिणः॥अस्त्रेप्रतिह
तेक्रुद्धोरावणोराक्षसाधिपः॥२१॥अभ्यवर्षत्तदारामंघोराभिश्चाश्मवृष्टिभिः॥ततःशरसहस्रेणपुनरक्लि
ष्टकारिणं॥२२॥रामबाणानभ्यहनद्घोराभिःशरवृष्टिभिः॥विषेदुर्देवगंधर्वाश्चारणाःपितरस्तथा॥२३॥राम

मांतं तदा दृष्ट्वा सिद्धाश्च परमर्षयः ॥ रामचंद्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा ॥ २४ ॥ प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियां ॥ समाक्रम्य बुधस्तस्थौ प्रजानामहिते रतः ॥ २५ ॥ सधूमः परिवृत्तोर्मिः प्रज्वलन्निव सागरः ॥ उत्पपात ततः क्रुद्धः स्पृशन्निव दिवाकरं ॥ २६ ॥ नष्टरूपश्च परुषो मंदरश्मिर्दिवाकरः ॥ अदृश्यत कबंधांकः समेतो धूमकेतुना ॥ २७ ॥ क्रसाश्च स्वरनिर्घोषा गगने पुरुषा घमाः ॥ औत्पातिकानि नर्दंतः समंतात्परिचक्रमुः ॥ २८ ॥ रामोपि वध्वा भ्रुकुटिं क्रोधसंरक्तलोचनः ॥ क्रोधं चकार सुभृशं निर्दहन्निव राक्षसं ॥ २९ ॥ तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः ॥ सर्वभूतानि वित्रेसुः प्राकंपत मही तदा ॥ ३० ॥ सिंहशार्दूलवान्छैलः प्रजज्वालाकुलद्रुमः ॥ बभूव चातिक्षुभितः समुद्र इव पर्वसु ॥ ३१ ॥ लंकायां रावणवधे यं प्रायुंक्त शरं प्रभुः ॥ जग्राह तं शरं दीप्तं निःश्वसंतमिवोरगं ॥ ३२ ॥ यमस्मै प्रथमं प्रादादगस्त्यो भगवानृषिः ॥ ब्रह्मदत्तं महाबाणं यमाह युधि तद्वधे ॥ ३३ ॥ ब्रह्मणा निर्मितं पूर्वमिंद्रायामिततेजसा ॥ दत्तं सुरपतेः पूर्वं त्रैलोक्यजयकांक्षिणः ॥ ३४ ॥ यस्य वाजेषु पवनः फले पावकभास्करौ ॥ शरीरमाकाशमयं गौरवे मेरुमंदरौ ॥ ३५ ॥ पर्वस्वपि च विन्यस्ता लोकपाला महौजसः ॥ धन

१ पर्वस्विवेतिसंबंधः ॥ २ यंचमहाबाणं ब्रह्मदत्तंप्राहेत्यन्वयः युधितद्वधेतद्वधनिमित्तंब्रह्मणानिर्मितमितिचान्वयः ॥

दोवरुणश्चैवपाशहस्तस्तथांतकः॥३६॥जाज्वल्यमानंवपुषासपुंखंहेमभूषितं॥तेजसासर्वभूतानांकृतंभास्क
रवर्चसा॥३७॥सधूममिवकालाग्निंदीप्यमानंरविंयथा॥रथनागाश्ववृंदानांभेदनंक्षिप्रकारिणं॥३८॥परि
घाणांसहस्राणांगिरीणांचैवभेदनं॥नानारुधिरसिक्तांगंमेदोदिग्धंसुदारुणं॥३९॥कालाभंसुमहानादंना
नाशक्तिविनाशनं॥शत्रूणांत्रासजननंसपक्षमिवपन्नगं॥४०॥काकगृध्रबकानांचगोमायुहकरक्षसं
॥नित्यंभक्ष्यप्रदंयुद्धेराक्षसानांभयावहं॥४१॥द्विषतांकीर्तिहरणंप्रकर्षकरमात्मनः॥अभिमंत्र्यततोराम
स्तंमहेषुंमहाभुजः॥४२॥वेदप्रोक्तेनविधिनाकुंडलीकृत्यकार्मुकं॥सरावणायतंवेगाच्चिक्षेपशरमुत्तमं
॥४३॥सस्सायकोधनुर्मुक्तोहंतुंरामेणरावणं॥धूमपूर्वंप्रजज्वालप्राप्यवायुपथंमहान्॥४४॥तंवज्रमिव
दुर्धर्षंवज्रपाणिविसर्जितं॥कृतांतकमिवावार्यंरावणोवीक्ष्यतत्पुरः॥४५॥हुंकृत्यकिलजग्राहबाणंवामेन
पाणिना॥ततस्तंजानुनाकृष्यबभंजराक्षसाधिपः॥४६॥भग्नेतस्मिन्शरेरामोविमनाइवतस्थिवान्॥सह
स्तकंधरःक्रुद्धःक्षुरप्रंगृह्यसायकं॥४७॥विव्याधराघवंवक्षः[1]सर्वप्राणेनराक्षसः॥वक्षोनिर्भिद्यसशरोरा
मस्यसुमहात्मनः॥४८॥भित्त्वामहींचसहसापातालतलमाविशत्॥ततोरामोमहाबाहुःपपातपुष्पकोपरि

[1] वक्षसि ॥

॥४९॥ निःसंज्ञो निश्चलश्चासीद्दाहाभूतानि चक्रिरे ॥ प्राकंपत मही सर्वा सपर्वतवनाब्धिका ॥ ऋषयः कांदिशीकास्ते हा रामदूतिवादिनः ॥५०॥ दशशतवदनो जितारिरुग्रो रणशिरसि प्रननर्त सानुमात्रः ॥ गगनतलगतानि पेतुरुल्काः प्रलयमिवापि च मेनिरे जनौघाः ॥५१॥ ॥इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अद्भुतोत्तरकांडे रामस्वप्राप्तितं नाम द्वाविंशत्तितमः सर्गः ॥२२॥ ॥एवं तथाविधं दृष्ट्वा मुनयो भयविह्वलाः ॥ हाहाकारं प्रकुर्वंतः शांतिं जेपुश्च केचन ॥१॥ तदातु मुनिभिर्दृष्टा सीता प्रहसितानना ॥ वसिष्ठप्रमुखाः सर्वे सीतां प्रोचुर्महर्षयः ॥२॥ सीते कथं श्रावितोयं रावणं राघवस्त्वया ॥ समुत्पन्नो विपाकोयं घोरो जनकनंदिनि ॥३ ॥क्व गता भ्रातरः सर्वे क्व गता वानरर्षभाः ॥ मंत्रिणः क्व गता भद्रे रामस्य किमुपस्थितं ॥४॥ श्रुत्वैतद्वचनं तेषां मुनीनां भावितात्मनां ॥ एवं तथाविधं दृष्ट्वा श्मशानं पुष्पकोपरि ॥५॥ पुंडरीकनिभे नेत्रे निमील्य रणमूर्द्धनि ॥ आलिंग्य चोरसा सुप्तं प्रियामिव धनुः शरं ॥६॥ नर्दंतं राक्षसं चापि महाबलपराक्रमं ॥ साट्टहासं विनद्योच्चैः सीता जनकनंदिनी ॥७॥ स्वरूपं प्रजहौ देवी महाविकटरूपिणी ॥ शुष्कामा कोटराक्षी च चक्रभ्रमितलोचना ॥८॥ दीर्घजंघा महारावा मुंडमालाविभूषणा ॥ अस्थिकिंकिणिका भीमा भीमवेगपराक्रमा ॥९॥ खरस्वरा महाघो

अ० द्भु० ४१

राविकृताविकृतानना॥चतुर्भुजादीर्घतुंडाशिरोलंकरणोज्ज्वला॥१०॥ललज्जिह्वाजटाजूटैर्मंडिताचंडरो-
मिका॥प्रलयांभोदकालाभाघंटापाशविधारिणी॥११॥अवस्कंद्यरथात्तूर्णंखड्गखर्परधारिणी॥श्येनीवरा-
वणखेपपातनिमिषांतरे॥१२॥शिरांसिरावणस्याशुनिमिषांतरमात्रतः॥खड्गेनतस्यचिच्छेदसहस्राणि
हलीलया॥१३॥अन्येषांयोद्धवीराणांशिरांसिनखरेणहि॥भिन्नानिपातयामासभूमौतेषांदुरात्मनां॥१४॥
केषांचित्पाटयामासनखैःक्रोष्ठानिजानकी॥खड्गेनचाच्छिनत्कांश्चित्कूर्परान्पादांश्चचिच्छिदे॥१५॥खंडंखंडं
चकारान्यांस्तिलशःकांश्चिदेवहि॥अंत्राण्यन्यस्याचकर्षपादाघातेनकांश्चन॥१६॥पार्श्वेननिजघानान्यान्पार्ष्णि-
नान्यानपोथयत्॥कांश्चिच्छुरीरघातेनदृष्ट्वाप्यन्यानपातयत्॥१७॥प्रलयंकुर्वतीसीताराक्षसानांभयंकरी॥नि-
जघानाट्टहासेनकांश्चित्पृष्ठेद्विधाकरोत्॥१८॥कांश्चित्केशान्समाकृष्यनिष्पिपेषमहीतले॥सरथान्सगजान्साश्वा-
न्सगदान्सहृतोमरान्॥१९॥कांश्चिद्दोर्भ्यान्समाकृष्यमज्जयामासवारिधौ॥गलेचाहृत्यकेषांचित्प्राणाञ्जग्राहजा-
नकी॥२०॥केषांचित्स्कंधआरुह्यशिरांस्युत्पाटितानिहि॥हुंकारेणाट्टहासेनकांश्चित्प्राणानहापयत्॥२१॥कां-
श्चित्सचूर्ण्यवदनंपशुमारममारयत्॥तान्सर्वान्निमिषेणैवनिहत्यजनकात्मजा॥२२॥तेषामंत्रेणशिरसांमालाभिः

रा० ४१

१ पुष्पकादिस्पर्धः सस्मार पुष्पकं रथमित्यत्र पुष्पकेरथशब्दप्रयोगात् ॥ १ ॥

कृतभूषणा॥रावणस्यशिरांस्युग्राण्यादायरणमूर्द्धनि॥२३॥कंदुकक्रीडनंकर्तुंमनश्चक्रेमनस्विनी॥एतस्मिन्नं
तरेतस्यारोमकूपेभ्यउद्गताः॥२४॥मातरोविकृताकाराःसाट्टहासाःसमाययुः॥सहकंदुकलीलार्थेसीताया
ताःसहस्रशः॥२५॥तासांकासांचिदाख्यास्येनामानिशृणुसुव्रत॥याभिर्व्याप्तास्त्रयोलोकाःकल्याणीभिश्चराच
रः॥२६॥प्रभावतीविशालाक्षीपालितागोनसीतथा॥श्रीमतीबहुलाचैवतथैवबहुपुत्रिका॥२७॥अप्सुजाताच
गोपालीबृहदंबालिकातथा॥जयावतीमालतिकाध्रुवरत्नाभयंकरी॥२८॥वसुदामाऽसुदामाचविशोकानं
दिनीतथा॥एकचूडामहाचूडाचक्रनेमिश्चटीतमा॥२९॥उत्तेजनीजयासेनाकमलाक्ष्यथशोभना॥शत्रुंजयात
थाचैवक्रोधनाशलभीखरी॥३०॥माधवीशुभ्रवस्त्राचतीर्थसेनीजटोज्ज्वला॥गीतप्रियाचकल्याणीकद्रुरोम
मिताशना॥३१॥मेघस्वनाभोगवतीसुभ्रूश्चकनकावती॥अलाताक्षीवेगवतीविद्युज्जिह्वाचभारती॥३२॥प
द्मावतीसुनेत्राचगंधराबहुयोजना॥सन्तालिकामहाकालीकमलाचमहाबला॥३३॥सुदामाबहुदामाचसु
प्रभाचयशस्विनी॥नृत्यप्रियापरानंदाप्रतोलूखलमेखला॥३४॥शतघंटाशतानंदाआनंदाभवतारिणी॥ः
वपुष्मतीचंद्रसीताभद्रकालीसटामला॥३५॥झंकारिकानिष्कुटिकाएमाचत्वरवासिनी॥सुमलासुस्तनवतीहृ

अ० कामाजयप्रिया॥३६॥धनदासुप्रसादाचभवदाघजनेश्वरी॥एडीभेडीसमेडीचवेताल जननीतथा॥३७॥कंदूतिः
दु० कंदुकाचैववेदमित्रासुदेविका॥लंबास्याकेतकीचैवचित्रसेनाचलाचला॥३८॥कुकुटिकाशंखलिकातथा
शंकुलिकाहडा॥कंदालिकाकाकलिकाकुंभिकाथशतोदरी॥३९॥उत्क्राथिनीजववेलाचमहावेगाचकंकिनी
५२ ॥मनोजवाकटकिनीप्रघसापूतनातथा॥४०॥खेशय्याचातिवृद्धिमाक्रोशनाथतडित्प्रभा॥मंदोदरीचतुंडीचको
टरामेघवाहिनी॥४१॥सुभगालंबिनीलंबाबहुचूडाविकत्थिनी॥ऊर्ध्ववेणीधराचैवपिंगाक्षीलोहमेखला॥४२॥
पृथुवक्त्रामधुलिहामधुकुंभातथैवच॥पक्षालीकामत्सरिकाजरापूर्जर्जरानना॥४३॥ख्यातादहदहाचैवतथा
धमधमाहिजा॥खंडखंडापृथुश्रोणीपूषणामणिकुट्टिका॥४४॥अम्लोचाचैवनिम्लोचातथालंबपयोधरा॥वे
णुवीणाधराचैवपिंगाक्षीलोहमेखला॥४५॥शशोलूकमुखीहृष्टाखरजंघामहाजवा॥शिशुमारमुखीश्वेता
लोहिताक्षीविभीषणा॥४६॥जटालिकाकामचरीदीर्घजिह्वाबलोत्कटा॥कालाहिकायामालीकामुकुटामुकु
टेश्वरी॥४७॥लोहिताक्षीमहाकायाहविपिंडाचपिंडिका॥एकत्वचासुकूर्मीचकुह्नाकर्णीचिकर्णिका॥४८॥सु रा०
रकर्णीचतुष्कर्णीकर्णप्रावरणातथा॥चतुष्पथनिकेताचगोकर्णीमहिषानना॥४९॥खरकर्णीमहाकर्णीमे। ५२

रीस्वनमहास्वना॥शंखकुंभश्रवाचैवभगदाचमहाबला॥५०॥गणाचसुगणाचैवकामदाप्यथकन्यका॥चतु
ष्पथरथाचैवभूतितीर्थान्यगोचरा॥५१॥पशुदाविभुदाचैवसुखदाचमहायशा॥पयोदागोमहिषदासुविशाला
चतुर्भुजा॥५२॥प्रतिष्ठासुप्रतिष्ठाचरोचमानासुलोचना॥नौकर्णीमुखकर्णीचविशिरामंथिनीतथा॥५३॥ए
कवक्त्रामेघरवामेघवामाहिरोचना॥एताश्चान्याश्चबहवोमातरःकोटिकोटिशः॥५४॥असंख्यातास्समाजग्मुः
क्रीडितुंसीतयासह॥दीर्घवक्त्र्योदीर्घदंत्योदीर्घतुंड्योद्विजोत्तम॥५५॥सस्तामधुराश्चैवयौवनस्थाःस्वलं
कृताः॥माहात्म्येनचसंयुक्ताःकामरूपधरास्तथा॥५६॥निर्मांसगात्र्यःश्वेताश्चतथाकांचनसन्निभाः॥कृष्ण
मेघनिभाश्चान्याधूम्राश्चद्विजपुंगव॥५७॥अरुणाभामहाभागादीर्घकेश्यःसितांबराः॥ऊर्ध्ववेणीधराश्चैव
पिंगाक्ष्योलंबमेखलाः॥५८॥लंबोदर्योलंबकर्ण्यस्तथालंबपयोधराः॥ताम्राक्ष्यस्ताम्रवर्णाश्चहर्यक्ष्यश्चत
थापराः॥५९॥शत्रूणांविग्रहेनित्यंभयदास्ताभवंत्यपि॥कामरूपधराश्चैवजवेवायुसमास्तथा॥६०॥शिरां
सिरक्षसांगृह्यगंडशैलोपमान्यपि॥चिक्रीडुःसीतयासार्द्धंतस्मिन्रणधरातले॥६१॥मुंडमालाधराश्चैवका
श्चिन्मुंडविभूषणाः॥रणांगणेमहाघोरेगृध्रकंकशिवान्विते॥६२॥मांसासृक्पंकिलेघोरेतत्रतत्रपुरोपमे॥नन

र्तजानकीदेवीघोरकालीमहाबला॥६३॥तदाचकंपेपृथिवीनौरिवानिलचालिता॥चेलुश्चभूधराःसर्वेसमुद्राश्चचकंपिरे॥६४॥स्वर्गिणांचविमानानिखात्पेतुर्भयतोद्विज॥सूर्यस्यदुद्रुवुर्भीतावाजिनोमुक्तरश्मयः॥६५॥यदानसेहेजानक्याभारंसोढुंवसुंधरा॥गंतुमैच्छत्पातालंसीतापादाग्रपीडिता॥६६॥अट्टहासेनसीतायामातृणांहुंकृतेनच॥प्रलयंमेनिरेलोकाःकिमेतदितिविह्वला॥६७॥धरापातालगमनंवितर्क्यसुरसत्तमैः॥संप्रार्थितोमहादेवःस्वयमायाद्रणाजिरं॥६८॥जानक्याःपादविन्यासेशवरूपधरोहरः॥आत्मानंस्तंभयामासधरणीधृतिहेतवे॥६९॥सर्वभारसहोदेवःसीतापादतलेस्थितः॥शवरूपोविरूपाक्षःसुस्थिताभूद्धरातदा॥७०॥तथाप्युपरिगालोकानस्थातुंसेहिरेक्षणं॥सीतायाःपादशब्देनशिरसाहुंकृतेनच॥निःश्वासवातसंघातैर्दुःस्थिताभूर्भुवादयः॥७१॥धरणितनययायद्भीमनृत्यंधरण्यांकृतमिहमनसातच्चिंतयंतोद्विजेंद्राः॥जयतिजयतिसीतेत्याहुरिंद्रादिदेवाःसपदिभुवनभंगंमन्यमानाविषेदुः॥७२॥ ॥इत्यार्षेश्रीमद्रामायणेआदिकाव्येवाल्मीकीयेअद्भुतोत्तरकांडेसहस्रवदनरावणवधोनामत्रयोविंशतितमःसर्गः॥२३॥ ॥[1]संरंभवेगंसीतायावीक्ष्यब्रह्मपुरोगमाः॥सलोकपालास्त्रिदशाऋषिभिःपितृभिःसह॥१॥प्रसादयितुमुद्युक्ताःसीतांतेतुष्टुवुःसुराः

[1] क्रोधवेगं ॥

॥कृतांजलिपुटादेवाःप्रणम्यचपुनःपुनः॥२॥ब्रह्माद्याःस्तोतुमारब्धाःसीतांराक्षसनाशिनीं॥यासामाहेश्वरी
शक्तिर्ज्ञानरूपातिलालसा॥३॥अनन्यानिष्कलेतत्त्वसंस्थितारामवल्लभा॥स्वाभाविकीचतन्मूलाप्रभाभानोस्त
यामला॥४॥एकासावैष्णवीशक्तिरणेकोपाधिवेगतः॥परापरेणरूपेणक्रीडंतीरामसन्निधौ॥५॥सेयंकरो
तिसकलंतस्याःकार्यमिदंजगत्॥नकार्यंचापिकरणमीश्वरस्येतिनिश्चयः॥६॥चतस्रःशक्तयोदेव्याःस्वरूप
त्वेनसंस्थिताः॥अधिष्ठानवशादस्याजानक्यारामयोषितः॥७॥शांतिर्विद्याप्रतिष्ठाचनिवृत्तिश्चेतिताःस्मृताः
॥चतुर्व्यूहस्ततोदेवःप्रोच्यतेपरमेश्वरः॥८॥अनयापरयादेवःस्वात्मानंदंसमश्नुते॥यत्वस्त्यनादिसंसिद्धमै
श्वर्यमतुलंमहत्॥९॥तत्संबंधादवाप्तंतद्रामेणपरमात्मना॥सैषासर्वेश्वरीदेवीसर्वभूतप्रवर्तिका॥१०॥
त्वयेदंभ्रामयेदीशोमायावीपुरुषोत्तमः॥सैषामायात्मिकाशक्तिःसर्वाकारासनातनी॥११॥वैश्वरूप्यंमहेश
स्यसर्वदासंप्रकाशयेत्॥अन्याश्चशक्तयोमुख्यास्त्वयादेविविनिर्मिताः॥१२॥ज्ञानशक्तिःक्रियाशक्तिःप्राण
शक्तिरितित्रयं॥सर्वासामेवशक्तीनांशक्तिमंतोविनिर्मिताः॥१३॥एकाशक्तिःशिवोप्येकःशक्तिमानुच्यते।
शिवः॥अभेदंचानुपश्यंतियोगिनस्तत्त्वदर्शितः॥१४॥शक्तयोजानकीदेवीशक्तिमंतोहिराघवः॥विशेषःक

अ०
यु०
४४

ष्यतेचायंपुराणेतत्त्ववादिभिः॥१५॥भोग्याविश्वेश्वरीदेवीरघूत्तमपतिव्रता॥प्रोच्यतेभगवान्भोक्तारघुवंशविव
र्धनः॥१६॥मंतारमेमतिःसीतामंतव्याचविचारतः॥एकंसर्वगतंसूक्ष्मंकूटस्थमचलंध्रुवं॥१७॥योगिनस्त
त्रपश्यंतितवदेव्याःपरंपदं॥अनंतमजरंब्रह्मकेवलंनिष्कलंपरं॥१८॥योगिनस्तत्रपश्यंतितवदेव्याःपरंप
दं॥सात्वंधात्रीवपरमायानंदनिधिमिच्छतां॥१९॥संसारतापानखिलान्हरसीश्वरसंश्रयात्॥नेदानींभूतसं
हारस्त्वयाकार्योमहेश्वरि॥२०॥रावणंसगणंहत्वाजगतांसुखमाहितं॥किंपुनर्नःसकलयाजगत्त्वंह्रियतेत्व
या॥२१॥एतच्छ्रुत्वाविशालाक्षीब्रह्मणोऽभ्यर्थनंवचः॥प्रीतासीत्तदाप्राहब्रह्माणंसहदैवतं॥२२॥पतिर्मे
पुंडरीकाक्षःपुष्पकोपरिराघवः॥विद्धःक्षुरप्रेणहृदिशेतेमृतकवत्प्रभुः॥२३॥तस्मिन्नेवंस्थितेदेवाःकिमिच्छा
मिजगद्धितं॥ग्रासमेकंकरिष्यामिजगदेतच्चराचरं॥२४॥श्रुत्वैतद्वचनंदेव्याःसंरंभसहितंसुराः॥हाहाकारं
प्रचक्रुस्तेसंचचालचमेदिनी॥२५॥ततोब्रह्मासुरैःसार्द्धंपुष्पकंरथमास्थितं॥श्रीरामंग्राहयामाससस्मृतिंस्पृष्ट्वा
स्वपाणिना॥२६॥उत्तस्थौचमहाबाहूरामःकमललोचनः॥रेरावणसुदुष्टस्त्वमद्यमद्बाणभेदितः॥२७॥दृस्य
स्याग्रेयुयमस्यास्यंभ्रूकुटीभीषणाकृतिः॥ब्रुवन्नेवंधनुर्गृह्यह्यपश्यत्त्रिदशान्सुरः॥२८॥नापश्यज्जानकींतत्र

रा०
४४

पेभ्योपिगरीयसीं॥नृत्यंतींचापरांकालीमपश्यच्चरणांगणे॥२९॥चतुर्भुजांल्ललज्जिव्हांखड्गखर्परधारिणीं॥श
वरूपमहादेवहृदिसंस्थांदिगंबरां॥३०॥पिबंतींरुधिरंभीमांकोटराक्षींक्षुधातुरां॥जगद्ग्रासेकृतोत्साहांमुं
डमालाविभूषणां॥३१॥भीमाकाराभिरन्याभिःक्रीडंतींरणमूर्द्धनि॥मुंडैराक्षसराजस्यखेलंतींकंदुकंमुदा॥
३२॥प्रलयध्वांतधाराभांसदाघर्घरनादिनीं॥अंत्रमुंडकरोन्यक्षस्कृत्तमालांचलत्पदां॥३३॥कबंधान्त्रास्र
सानांचतयासहविनृत्यतः॥रथवाजिगजानांचशकलानिव्यलोकयत्॥३४॥नैकोपिराक्षसोयत्रकरपा
दशिरोयुतः॥कबंधायेचनृत्यंतितेषांपादाःप्रतिष्ठिताः॥३५॥कबंधंरावणस्यापिनृत्यंतंचव्यलोकयत्॥ः
तद्दृष्ट्वातुमहाघोरंप्रेतराजपुरोपमं॥३६॥कालींचवीक्ष्यनृत्यंतींमातृभिःसहितां द्विज॥पपातहस्ताद्रामस्यवै
पतःसशरंधनुः॥३७॥भयाच्चनिमिमीलाशुरामःपद्मविलोचने॥दृष्ट्वैवंविस्मितंदृष्ट्वाब्रह्मोवाचरघूत्तमं॥३८॥
तांदृष्ट्वाविह्वलंसीताकुड्यंचापिचरावणं॥रथादवस्कंधसतीपपातरणमूर्द्धनि॥३९॥भीमांचमूर्त्तिमालंब्यरोम
कूपाच्चमातृकाः॥निर्माय्यताभिःसहिताहत्वारावणमग्रतः॥४०॥रक्षसांनिधनंकृत्वानृत्यंतीयंव्यवस्थिता॥
अनयासहितोराम सृजस्यवसिहंसिच॥४१॥नानयासहितोरामकिंचित्कर्तुमपिक्षमः॥इतिबोधयितुंसीताच

अ०
दु०
४५

कारतदनिंदिता॥४२॥पश्यैतांजानकींरामत्यजभीतिंमहाभुज॥निर्गुणांसगुणांसाक्षात्सदसद्व्यक्तिवर्जितां॥
४३॥इत्येतद्द्रुहिणवचोनिशम्यरामःश्रुतिसुखमात्महितंपराभिमर्द्दी॥शुचमनुविजहौविचार्यकिंचिज्जनक
सुतामनुपश्यतिस्मपश्चात्॥४४॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेरामाश्व
सनंनामचतुर्विंशतितमःसर्गः॥२४॥ ॥ब्रह्मणोवचनंश्रुत्वारामःकमललोचनः॥प्रोन्मील्यशनकैरक्षिवेप
मानोमहाभुजः॥१॥प्रणम्यशिरसाभूमौतेजसाचापिविव्हलः॥भीतःकृतांजलिपुटःप्रोवाचपरमेश्वरीं॥२
कात्वंदेविविशालाक्षी शशांकावयवांकिते॥नजानेत्वांमहादेवियथावद्ब्रूहिपृच्छते॥३॥रामस्यवचनंश्रुत्वा
ततःसापरमेश्वरी॥व्याजहाररघुव्याघ्रंयोगिनामभयप्रदा॥४॥मांविद्धिपरमांशक्तिंमहेश्वरसमाश्रयां॥अन
न्यामव्ययामेकांयांपश्यंतिमुमुक्षवः॥५॥अहंवैसर्वभावानामात्मासर्वांतराशिवा॥शाश्वतीसर्वविज्ञानासर्व
मूर्तिप्रवर्तिका॥६॥अनंतानंतमहिमासंसारार्णवतारिणी॥दिव्यंददामितेचक्षुःपश्यमेपदमैश्वरं॥७॥इत्यु
क्त्वाविरराममैषारामोपश्यच्चतत्पदं॥कोटिसूर्यप्रतीकाशंविषकृतेजोनिराकुलं॥८॥ज्वालावलिसहस्राढ्यं
कालानलशतोपमं॥दंष्ट्राकरालंदुर्द्धर्षंजटामंडलमंडितं॥९॥त्रिशूलवरहस्तंचघोररूपंभयावहं॥प्रशाम्य

रा०
४५

सौम्यवदनमनंतैश्वर्यसंयुतं ॥१०॥ चंद्रावयवलक्ष्माढ्यं चंद्रकोटिसमप्रभं ॥ किरीटिनं गदाहस्तं नूपुरैरुप
शोभितं ॥११॥ दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं ॥ शंखचक्रकरं काम्यं त्रिनेत्रं कृत्तिवाससं ॥१२॥ अंतः
स्थं चांडबाह्यस्थं बाह्याभ्यंतरतः परं ॥ सर्वशक्तिमयं शांतं सर्वाकारं सनातनं ॥१३॥ ब्रह्मेंद्रोपेंद्रयोगींद्रैरीड्यमा
नपदांबुजं ॥ सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखं ॥१४॥ सर्वमावृत्य तिष्ठंतं ददर्श पदमैश्वरं ॥ दृष्ट्वा च तादृशं
रूपं दिव्यं माहेश्वरं पदं ॥१५॥ तथैव च समाविष्टः स एमोहहृतमानसः ॥ आत्मन्याधाय चात्मानमोंकारं समनु
स्मरन् ॥१६॥ नाम्नामष्टसहस्रेण तुष्टाव परमेश्वरीं ॥ ॥ॐ सीतोमा परमाशक्तिरनंता निष्कलामला ॥१७॥ शां
ता माहेश्वरी नित्या शाश्वती १० परमाक्षरा ॥ अचिंत्या केवलानंता शिवात्मा परमात्मिका ॥१८॥ अनादिरव्यया
शुद्धा देवात्मा २० सर्वगोचरा ॥ एकानेकविभागस्था मायातीता सुनिर्मला ॥१९॥ महामाहेश्वरी शक्ता महादेवी
निरंजना ॥ काष्ठा ३० सर्वांतरस्था च चिच्छक्तिरतिलालसा ॥२०॥ जानकी मिथिलानंदा राक्षसांतविधायिनी ॥ रा
वणांतकरी रम्या रामवक्षःस्थलालया ॥२१॥ उमा सर्वात्मिका ४० विद्या ज्योतीरूपाऽयुताक्षरी ॥ शांतिः प्रतिष्ठा
सर्वेषां निवृत्तिरमृतप्रदा ॥२२॥ व्योममूर्तिर्व्योममयी व्योमाधारा ५० च्युतालता ॥ अनादिनिधना योषा कारणात्मा

---

१ पुंस्त्वमार्षं ॥ एवमेवोतरत्र विशेषणद्वये ॥

कलाकुला॥२३॥नंदप्रथमजानाभिरमृतस्यांतसंश्रया॥प्राणेश्वरप्रिया ६० मातामहीमहिषवाहिनी॥२४॥प्राणे
श्वरीप्राणरूपाप्रधानपुरुषेश्वरी॥सर्वशक्तिःकलाकाष्ठाज्योत्स्नेंदो ७० र्महिमास्पदा॥२५॥सर्वकार्यनियंत्रीच
सर्वभूतेश्वरेश्वरी॥अनादिरव्यक्तगुणामहानंदासनातनी॥२६॥आकाशयोनिर्योगस्थासर्वयोगेश्वरेश्वरी ८०॥
शवासनाचितांतःस्थामहेशीवृषवाहिनी॥२७॥बालिकातरुणीवृद्धावृद्धमाताजरातुरा॥महामाया ९० सुदुष्पूरा
मूलप्रकृतिरीश्वरी॥२८॥संसारयोनिःसकलासर्वशक्तिसमुद्भवा॥संसारसारादुर्वारादुर्निरीक्ष्यादुरासदा १००॥
॥२९॥प्राणशक्तिःप्राणविद्यायोगिनीपरमाकला॥महाविभूतिर्दुर्धर्षामूलप्रकृतिसंभवा॥३०॥अनाद्यनंत
विभवापरा त्मापुरुषोबली ११०॥सर्गस्थित्यंतकरणीसुदुर्वाच्यादुरत्यया॥३१॥शब्दयोनिःशब्दमयीनादा
ख्यानादविग्रहा॥प्रधानपुरुषातीताप्रधानपुरुषात्मिका॥३२॥पुराणी १२० चिन्मयीपुंसामादिःपुरुषरूपि
णी॥भूतांतरात्माकूटस्थमहापुरुषसंज्ञिता॥३३॥जन्ममृत्युजरातीतासर्वशक्तिसमन्विता॥व्यापिनीचानव
च्छिन्ना १३० प्रधानानुप्रवेशिनी॥३४॥क्षेत्रज्ञाशक्तिरव्यक्तलक्षणामलवर्जिता॥अनादिमायासंभिन्नात्रितत्त्वा
प्रकृतिर्गुणा १४०॥३५॥महामायासमुत्पन्नातामसीपौरुषंध्रुवा॥व्यक्ताव्यक्तात्मिकाकृष्णारक्ताशुक्लाप्रसूतिका॥

॥३६॥स्वकार्या १५०कार्यजननीब्रह्मास्याब्रह्मसंश्रया॥व्यक्ताप्रथमजाब्राह्मीमहतीज्ञानरूपिणी॥३७॥वैराग्यैश्व
र्यधर्मात्माब्रह्ममूर्त्ति १६० हृदिस्थिता॥जयदाजित्वरीजैत्रीजयश्रीर्जयशालिनी॥ ३८॥सुखदाशुभदासत्यासु
भा १७० संक्षोभकारिणी॥अपांयोनिःस्वयंभूतिर्मानसीतत्वसंभवा॥३९॥ईश्वराणीचशर्वाणीशंकरार्द्धशरीरिणी॥
भवानीचैवरुद्राणी १८० महालक्ष्मीरथांबिका॥४०॥माहेश्वरीसमुत्पन्नाभुक्तिमुक्तिफलप्रदा॥सर्वेश्वरीसर्व
वर्णानित्यामुदितमानसा॥४१॥ब्रह्मेंद्रोपेंद्रनमिताशंकरेच्छानुवर्त्तिनी १९०॥ईश्वरार्द्धासनगतारघूत्तमपतिव्र
ता॥४२॥सत्कद्धिभाविता सर्वासमुद्रपरिशोषिणी॥ पार्वतीहिमवत्पुत्रीपरमानंददायिनी॥४३॥गुणाढ्यायोगदा
२००योग्याज्ञानमूर्तिर्विकाशिनी॥सावित्रीकमलालक्ष्मीःश्रीरनंतोरसिस्थिता॥४४॥सरोजनिलयाशुभ्रायोग
निद्रा २१० सुदर्शना॥सरस्वतीसर्वविद्याजगज्ज्येष्ठासुमंगला॥४५॥वासवीवरदावाच्याकीर्तिःसर्वार्थसाधि
का २२०॥वागीश्वरीसर्वविद्यामहाविद्यासुशोभना॥४६॥गुह्यविद्यात्मविद्याचसर्वविद्यात्मभाविता॥स्वाहावि
श्वंभरी २३० सिद्धिःस्वधामेधाधृतिःश्रुतिः॥४७॥नाभिःसुनाभिःसुकृत्ति र्माधवीनरवाहिनी॥ २४०॥पूजाविभाव
रीसौम्याभगिनीभोगदायिनी॥४८॥शोभावशंकरीलीलामानिनीपरमेष्ठिनी २५०॥त्रैलोक्यसुंदरीरम्यासुंदरी

अ० दु० ४७

कामचारिणी॥४८॥महानुभावमध्यस्थामहामहिषमर्द्दिनी॥पद्ममालापापहराविचित्र मुकुटानना॥५०॥कां
ता २६० चित्रांबरधरादिव्याभरणभूषिता॥हंसाख्याव्योमनिलयाजगत्सृष्टिविवर्द्धिनी॥५१॥निर्यंत्रामंत्रवाह
स्यानंदिनीभद्रकालिका॥आदित्यवर्णा २७० कौमारीमयूरवरवाहिनी॥५२॥वृषासनगतागौरीमहाकाली
सुरार्चिता॥अदितिर्नियतारौद्रीपद्मगर्भा २८० विवाहना॥५३॥विरूपाक्षीलेलिहानामहासुरविनाशिनी॥म
हाफलानवद्यांगीकामपूराविभावरी॥५४॥विचित्ररत्नमुकुटाप्रणतर्द्धिविवर्द्धिनी २९०॥कौशिकीकर्षिणी
रात्रिस्त्रिदशार्त्तिविनाशिनी॥५५॥विरूपाचसुरूपाचभीमामोक्षप्रदायिनी॥भक्तार्त्तिनाशिनीभव्या ३००भव
भावविनाशिनी॥५६॥निर्गुणानित्यविभवानिःसारानिरपत्रपा॥यशस्विनीसामगीतिर्भवांगनिलयालया॥५७॥
दीक्षा ३१० विद्याधरीदीप्तामहेंद्रविनिपातिनी॥सर्वातिशायिनीविद्यासर्वशक्तिप्रदायिनी॥५८॥सर्वेश्वरप्रि
यातार्क्षीसमुद्रांतरवासिनी॥अकलंकानिराधारा ३२०नित्यसिद्धानिरामया॥५९॥कामधेनुर्बृहद्गर्भाधीमती
मोहनाशिनी॥निःसंकल्पानिरातंकाविनयाविनयप्रदा ३३०॥६०॥ज्वालामालासहस्राढ्यादेवदेवीमनोन्म
नी॥उर्वीगुर्वीगुरुःश्रेष्ठासगुणाषड्गुणात्मिका॥६१॥महाभगवती ३४० भव्यावसुदेवसमुद्भवा॥महेंद्रोपेंद्र

रा०
४७

भगिनीभक्तिगम्यापरायणा॥६२॥ज्ञानज्ञेयाजरातीतावेदांतविषयागतिः॥दक्षिणा ३५०दहनाबाह्यासर्वभूतनम
स्कृता॥६३॥योगमायाविभावज्ञामहामोहामहीयसी॥सत्यासर्वसमुद्भूतिर्ब्रह्मवृक्षाश्रया ३६०मतिः॥६४॥
बीजांकुरसमुद्भूतिर्महाशक्तिर्महामतिः॥ख्यातिःप्रतिज्ञाचित्संविन्महायोगेंद्रशायिनी॥६५॥विकृतिः ३७०शां
करीशास्त्रीगंधर्वयक्षसेविता॥वैश्वानरीमहाशालादेवसेनागुहप्रिया॥६६॥महारात्रीशिवानंदाशची ३८०दुः
स्वप्ननाशिनी॥पूज्याऽपूज्याजगद्धात्रीदुर्विनेयस्वरूपिणी॥६७॥गुहांबिकागुहोत्पत्तिर्महापीठामरुत्सुता॥ह
व्यवाहांतरा ३९०गार्गीहव्यवाहसमुद्भवा॥६८॥जगद्योनिर्जगन्माताजगन्मृत्युर्जरातिगा॥बुद्धिर्माताबुद्धिमती
पुरुषांतरवासिनी ५००॥६९॥तपस्विनीसमाधिस्थात्रिनेत्रादिविसंस्थिता॥सर्वेंद्रियमनोमातासर्वभूतहृदि
स्थिता॥७०॥संसारतारिणीविद्याब्रह्मवादिमनोलया॥ब्रह्माणीबृहती ४१०ब्राह्मीब्रह्मभूताभवावनिः॥७१॥
हिरण्मयीमहारात्रिःसंसारपरिवर्तिका॥सुमालिनीसुरूपाचतारिणीभाविनी ४२०प्रभा॥७२॥उन्मीलनीसर्व
सहासर्वप्रत्ययसाक्षिणी॥तपिनीतापिनीविश्वाभोगदाधारिणीधरा ४३०॥७३॥सुसौम्याचंद्रवदनातांडवास
क्तमानसा॥सत्त्वशुद्धिकरीशुद्धिर्मलत्रयविनाशिनी॥७४॥जगत्प्रियाजगन्मूर्तिस्त्रिमूर्तिरमृताश्रया ४४०॥

अ०
दु०
४८

निराश्रयानिराहारानिरंकुशरणोद्भवा॥७५॥चक्रहस्ताविचित्रांगीस्रग्विणीपद्मधारिणी॥परापरविधानज्ञा
महापुरुषपूर्वजा॥७६॥विद्येश्वरप्रियाऽ४५०विद्याविद्युज्जिह्वाजितश्रमा॥विद्यामयीसहस्राक्षीसहस्र
श्रवणात्मजा॥७७॥सहस्ररश्मिपद्मस्थामहेश्वरपदाश्रया॥ज्वालिनी४६०सद्मनाव्याप्तातैजसीपद्मरोधि
का॥७८॥महादेवाश्रयामान्यामहादेवमनोरमा॥व्योमलक्ष्मीःसिंहरथाचेकितान्यमितप्रभा४७०॥७९॥ः
विश्वेश्वरीविमानस्थाविशोकाशोकनाशिनी॥अनाहताकुंडलिनीनलिनीपद्मवासिनी॥८०॥शतानंदासतां
कीर्तिः४८०सर्वभूताशयस्थिता॥वाग्देवताब्रह्मकलाकलातीताकलावती॥८१॥ब्रह्मर्षिर्ब्रह्महृदयाब्र
ह्मविष्णुशिवप्रिया॥व्योमशक्तिःक्रियाशक्ति४९०जनशक्तिःपरागतिः॥८२॥क्षोभिकारौद्रिकाभेद्याभेदा
भेदविवर्जिता॥अभिन्नाभिन्नसंस्थानावंशिनीवंशहारिणी॥५००॥८३॥गुह्यशक्तिर्गणातीतासर्वदास
र्वतोमुखी॥भगिनीभगवत्पत्नीसकलाकालकारिणी॥८४॥सर्ववित्सर्वतोभद्रा५१०गुह्यातीतागुहाव
लिः॥प्रक्रियायोगमाताचगंधाविश्वेश्वरेश्वरी॥८५॥कपिलाकपिलाकांताकनकाभाकलांतरा५२०॥पु
ण्यापुष्करिणीभोक्त्रीपुरंदरपुरःसरा॥८६॥पोषणीपरमैश्वर्यभूतिदाभूतिभूषणा॥पंचब्रह्मसमुत्पत्तिः

ए०
४८

परमात्मात्मविग्रहा ॥ ८७ ॥ नर्मदा ५३० भानुमती योगिज्ञेया मनोजवा ॥ बीजरूपा रजोरूपा वशिनी योगरूपि
णी ॥ ८८ ॥ सुमंत्रा मंत्रिणी पूर्णा ५४० ल्हादिनी क्लेशनाशिनी ॥ मनोहरी मनोरम्या तापसी वेदरूपिणी ॥ ८९ ॥ वे
दशक्तिर्वेदमाता वेदविद्याप्रकाशिनी ॥ योगेश्वरेश्वरी ५५० माला महाशक्तिर्मनोमयी ॥ ९० ॥ विश्वावस्था वीर
मुक्तिर्विद्युन्माला विहायसी ॥ पीवरी सुरभिवंद्या ५६० नंदिनी नंदिवल्लभा ॥ ९१ ५७० ॥ भारती परमानंदा परापरविभे
दिका ॥ सर्वग्रहरणोपेता काम्या कामेश्वरेश्वरी ॥ ९२ ॥ अचिंत्याऽचिंत्यमहिमा दुर्लेखा कनकप्रभा ॥ कूष्मांडी
धनरत्नाढ्या सुगंधा गंधदायिनी ॥ ९३ ॥ त्रिविक्रमपदोद्भूता धनुष्पाणिः शिरोहया ॥ सुदुर्लभा ५८० धना
ध्यक्षा धन्या पिंगललोचना ॥ ९४ ॥ भ्रांतिः प्रभावती दीप्तिः पंकजायतलोचना ॥ आद्या हृत्कमलोद्भूता प
रमाता ५९० रणप्रिया ॥ ९५ ॥ सत्क्रिया गिरिजा नित्यशुद्धा पुष्पनिरंतरा ॥ दुर्गा कात्यायनी चंडी चर्चिका शां
तविग्रहा ६०० ॥ ९६ ॥ हिरण्यवर्णा रजनी जगन्मंत्रप्रवर्तिका ॥ मंदराद्रिनिवासा च शारदा स्वर्णमालिनी
॥ ९७ ॥ रत्नमाला रत्नगर्भा पृथ्वी विश्वप्रमाथिनी ६१० ॥ पद्मासना पद्मनिभा नित्यतुष्टाऽमृतोद्भवा ॥ ९८ ॥
धुन्वती दुष्प्रकंपा च सूर्यमाता दृषद्वती ॥ महेंद्रभगिनी माया ६२० वरेण्या वरदर्पिता ॥ ९९ ॥ कल्याणी कम

अ॰ मलारभापंचभूतवरप्रदा॥वाच्यावरेश्वरीनंद्यादुर्जेया ६३० दुरतिक्रमा॥१००॥कालरात्रिर्महावेगावीरभद्रा
दुं॰ हितप्रिया॥भद्रकालीजगन्माताभक्तानांभद्रदायिनी॥१०१॥करालापिंगलाकारानामवेदा ६४० महानदा
४९ ॥तपस्विनीयशोदाचयथाध्वपरिवर्तिनी॥१०२॥शंखिनीपद्मिनीसांख्यासांख्ययोगप्रवर्तिका॥चैत्रीसंवत्सरा॥
६५० रुद्राजगत्संपूर्णींद्रजा॥१०३॥शुंभारिःखेचरीखस्थाकंबुग्रीवाकलिप्रिया॥खरध्वजाखरारूढा ६६०
परार्ध्यापरमालिनी॥१०४॥ऐश्वर्यरत्ननिलयाविरक्तागरुडासना॥जयंतीहृद्गुहारम्यासत्त्ववेगागणाग्रणीः
॥१०५॥संकल्पसिद्धा ६७० साम्यस्थासर्वविज्ञानदायिनी॥कलिकल्मषहंत्रीचगुह्योपनिषदुत्तमा १०६
निष्ठादृष्टिःस्मृतिर्व्याप्तिःपुष्टिस्तुष्टिः ६८० क्रियावती॥विश्वामरेश्वरेशानाभुक्तिर्मुक्तिःशिवामृता॥१०७॥
लोहितासर्वमाताचभीषणावनमालिनी॥६९०॥अनंतशयनाऽनाद्यानरनारायणोद्भवा॥१०८॥नृसिंहीदै
त्यमथिनीशंखचक्रगदाधरा॥संकर्षणसमुत्पत्तिरंबिकोपांतसंश्रया॥१०९॥महाज्वालामहामूर्तिः ७००
सुमूर्तिःसर्वकामधुक्॥सुप्रभासुतरागौरीधर्मकामार्थमोक्षदा॥११०॥भ्रूमध्यनिलयाऽपूर्वाप्रधानपुरुषा रा॰
वली॥महाविभूतिदा ७१० मध्यासरोजनयनाऽसना॥१११॥अष्टादशभुजानाट्यानीलोत्पलदलप्रभा॥: ४९

सर्वध्यात्यासमारूढाधर्माधर्मानुवर्जिता ॥ ११२ ॥ वैराग्यज्ञाननिरतानिरालोका ७२० निरिंद्रिया ॥ विचित्रगहना
धीराशाश्वतस्थानवासिनी ॥ ११३ ॥ स्थानेश्वरीनिरानंदात्रिशूलवरधारिणी ॥ अशेषदेवतामूर्तिर्देवतापरदेवता
७३० ॥ ११४ ॥ गणात्मिकागिरेःपुत्रीनिशुंभविनिपातिनी ॥ अवर्णावर्णरहितानिवर्णाबीजसंभवा ॥ ११५ ॥ अ
नंतवर्णाऽनन्यस्थाशंकरी ७४० शांतमानसा ॥ अगोत्रागोमतीगोप्त्रीगुह्यरूपागुणांतरा ॥ ११६ ॥ गोश्रीर्गव्यप्रि
यागौरीगणेश्वरनमस्कृता ॥ सत्यमात्रा ७५० सत्यसंधात्रिसंध्यासंधिवर्जिता ॥ ११७ ॥ सर्ववादाश्रयासांख्यासां
ख्ययोगसमुद्भवा ॥ असंख्येयाऽप्रमेयाख्याशून्याशुद्धकुलोद्भवा ७६० ॥ ११८ ॥ बिंदुनादसमुत्पत्तिःशंभुवामा
शशिप्रभा ॥ विसंगाभेदरहितामनोज्ञामधुसूदनी ॥ ११९ ॥ महाश्रीःश्रीसमुत्पत्ति ७७० स्तमःपारेप्रतिष्ठिता
॥ त्रितत्वमातात्रिविधासुसूक्ष्मपदसंश्रया ॥ १२० ॥ शांत्यतीतामलातीतानिर्विकारानिराश्रया ॥ शिवाख्या
चित्तनिलया ७८० शिवज्ञानस्वरूपिणी ॥ १२१ ॥ दैत्यदानवनिर्मात्रीकाश्यपीकालकर्णिका ॥ शास्त्रयोनिः
क्रियामूर्तिश्चतुर्वर्गप्रदर्शिता ॥ १२२ ॥ नारायणीनवोद्भूताकौमुदी ७९० लिंगधारिणी ॥ कामुकीललि
तातारापरापरविभूतिदा ॥ १२३ ॥ परांतजातमहिमावडवावामलोचना ॥ सुभद्रादेवकी ८०० सीतावेदवेदां

गपारगा॥१२४॥मनस्विनीमनुमातामहामन्युसमुद्भवा॥अमृत्युरमृतास्वादापुरुहूतापुरुष्टुता॥१२५॥अशो
च्या८१०भिन्नविषयाहिरण्यरजतप्रिया॥हिरण्याराजतीहैमीहेमाभरणभूषिता॥१२६॥विभ्राजमानादुर्ज्ञे
याज्योतिष्टोमफलप्रदा॥महानिद्रा८२०समुद्भूतिर्बलींद्रासत्यदेवता॥१२७॥दीर्घाककुद्मीनीविद्याशांतिदा
शांतिवर्द्धिनी॥लक्ष्म्यादिशक्तिजननीशक्तिचक्रप्रवर्तिका॥१२८॥त्रिशक्तिजननी८३०जन्याषडूर्मिपरिवर्जि
ता॥स्वाहाचकर्मकरणीयुगांतदलनात्मिका॥१२९॥संकर्षणाजगद्धात्रीकामयोनिःकिरीटिनी॥ऐंद्री८४०
त्रैलोक्यनमितावैष्णवीपरमेश्वरी॥१३०॥प्रद्युम्नदयितादांतायुग्मदृष्टिस्त्रिलोचना॥महोत्कटाहंसगतिः
प्रचंडा८५०चंडविक्रमा॥१३१॥वृषावेशावियन्मात्राविंध्यपर्वतवासिनी॥हिमवन्मेरुनिलयाकैलासगिरिवा
सिनी॥१३२॥चाणूरहंत्रीतनयानीतिज्ञाकामरूपिणी ८६०॥वेदविद्याव्रतरताधर्मशीलाऽनिलाशना १३३
अयोध्यानिलयावीरामहाकालसमुद्भवा॥विद्याधरप्रियासिद्धाविद्याधरनिराकृतिः॥१३४॥आप्यायंती
८७०वहंतीचपावनीपोषणीखिला॥मातृकामन्मथोद्भूतावारिजावाहनप्रिया॥१३५॥करीषिणीस्वधावा
णी८८०वीणावादनतत्परा॥सेवितासेविकासेवासिनीवालीगरुत्मती॥१३६॥अरुंधतीहिरण्याक्षीमणि

दाश्रीवसुप्रदा ८९० ॥वसुमतीवसोर्धारावसुंधरासमुद्भवा॥१३७॥वरारोहावरार्हाचवपुःसंगसमुद्भवा॥श्री
फली॥श्रीमती श्रीशाश्रीनिरासा ९०० हरिप्रिया॥१३८॥ श्रीधरीश्रीकरीकंप्राश्रीधराईशवीरणी॥अनंतदृष्टि
रक्षुद्राधात्रीशाधनदप्रिया ९१० ॥१३९॥निहंत्रीदैत्यसिंहानांसिंहिकासिंहवाहिनी॥सुसेनाचंद्रनिलया
सुकीर्तिश्छिन्नसंशया॥१४०॥बलज्ञाबलदावामा ९२० लेलिहानाऽमृतास्रवा॥नित्योदितास्वयंज्योतिरु
त्सुकाऽमृतजीविनी॥१४१॥वज्रदंष्ट्रावज्रजिह्वावैदेहीवज्रविग्रहा॥९३०॥मंगल्यामंगलामालामलिना
मलहारिणी॥१४२॥गांधर्वीगारुडीचांद्रीकंबलाश्वतरप्रिया॥सौदामिनी ९४० जनानंदाभ्रुकुटीकुटिला
नना॥१४३॥कर्णिकारकराकक्षाकंसप्राणापहारिणी॥युगंधरायुगावर्त्तात्रिसंध्याहर्षवर्धिनी॥१४४॥
प्रत्यक्षदेवता ९५० दिव्यादिव्यगंधादिवापरा॥शक्रासनगताशाक्रीसाध्वीनारीशवासना॥१४५॥इष्टाविशि
ष्टा ९६० शिष्टेष्टाशिष्टाशिष्टप्रपूजिता॥शतरूपाशतावर्त्ताविनीतासुरभिःसुरा॥१४६॥सुरेंद्रमातासुद्युम्ना
९७० सुषुम्णासूर्यसंस्थिता॥समीक्ष्यासत्प्रतिष्ठाचनिवृत्तिर्ज्ञानपारगा॥१४७॥धर्मशास्त्रार्थकुशलाधर्मज्ञाध
र्मवाहना॥धर्माधर्मविनिर्मात्री ९८० धर्मिकाणांशिवप्रदा॥१४८॥धर्मशक्तिर्धर्ममयीविधर्माविश्वधर्मिणी॥४

धर्मांतराधर्ममध्याधर्मपूर्वाधनप्रिया॥१४९॥धर्मोपदेशगा ९९० धर्मात्माधर्मलभ्याधराधरा॥कपालीशाकला
मूर्तिःकलाकलितविग्रहा॥१५०॥सर्वशक्तिविनिर्मुक्तोसर्वशक्त्याश्रयाश्रया॥सर्वासर्वेश्वरी १००० सूक्ष्मा
सुसूक्ष्माज्ञानरूपिणी॥१५१॥प्रधानपुरुषेशानामहापुरुषसाक्षिणी॥सदाशिवावियन्मूर्तिर्देवमूर्तिरमूर्ति
का॥१०००८॥१५२॥एवंनाम्नांसहस्रेणतुष्टावरघुनंदनः॥कृतांजलिपुटोभूत्वासीतांहृष्टतनूरुहा॥१५३॥
भारद्वाजमहाभागयश्चैतत्स्तोत्रमद्भुतं॥पठेद्वापाठयेद्वापिसयातिपरमंपदं॥१५४॥ब्रह्मक्षत्रियविड्योनिर्ब्रह्म
प्राप्नोतिशाश्वतं॥शूद्रःसद्गतिमाप्नोतिधनधान्यविभूतयः॥१५५॥भवंतिस्तोत्रमाहात्म्यादेतत्स्वस्त्ययनंमहत्॥
मारीभयेराजभयेतथाचोराग्निजेभये॥१५६॥व्याधीनांप्रभवेघोरेशत्रूत्थानेचसंकटे॥अनावृष्टिभयेविप्रसर्वशां
तिकरंपरं॥१५७॥यद्यदिष्टतमंयस्यतत्तत्सर्वंस्तोत्रतोभवेत्॥यत्रैतत्पठ्यतेसम्यक्सीतानामसहस्रकं॥१५८
रामेणसहितादेवीतत्रतिष्ठत्यसंशयः॥महापापातिपापानिविलयंयांतिसुव्रत॥१५९॥ ॥इत्यार्षेश्रीम
द्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेसीतासहस्रनामस्तोत्रकथनंनामपंचविंशतितमःसर्गः॥
॥२५॥एवंनामसहस्रेणस्तुत्वासौरघुनंदनः॥भूयःप्रणम्यप्रीतात्माप्रोवाचेदंकृतांजलिः॥१॥यदेतदैश्वरं

रूपंघोरंतेपरमेश्वरि॥भीतोस्मिसांप्रतंदृष्ट्वारूपमन्यत्प्रदर्शय॥२॥एवमुक्तायसादेवीतेनरामेणमैथिली
संहृत्यदर्शयामासस्वंरूपंपरमंपुनः॥३॥कांचनांबुरुहप्रख्यंपद्मोत्पलसुगंधिकं॥सुनेत्रंद्विभुजंसौम्यंनी
लालकविभूषितं॥४॥रक्तपादांबुजतलंसुरक्तकरपल्लवं॥श्रीमद्विशालसद्वृत्तललाटतिलकोज्ज्वलं॥
५॥भूषितंचारुसर्वांगंभूषणैरभिशोभितं॥दधानंसुरसांमालांविशालांहेमनिर्मितां॥६॥ईषत्स्मितंसुबिं
बोष्ठंनूपुरांबरसंयुतं॥प्रसन्नवदनंदिव्यमनंतमहिमास्पदं॥७॥तदीदृशंसमालोक्यरूपंरघुकुलोत्तमः
॥भीतिंसंत्यज्यहृष्टात्माबभाषेपरमेश्वरीं॥८॥अद्यमेसफलंजन्मअद्यमेसफलंतपः॥यन्मेसाक्षात्त्वमव्य
क्ताप्रसन्नादृष्टिगोचरा॥९॥त्वयासृष्टंजगत्सर्वंप्रधानाद्यंत्वयिस्थितं॥त्वय्येवलीयतेदेवित्वमेवचप
रागतिः॥१०॥वदंतिकेचित्त्वामेवप्रकृतिंविकृतेःपरां॥अपरेपरमात्मज्ञाःशिवेतिशिवसंश्रये॥११॥त्वयि
प्रधानंपुरुषोमहान्ब्रह्मातथेश्वरः॥अविद्यानियतिर्मायाकालाद्याःशतशोभवन्॥१२॥त्वंहिसापरमाश
क्तिरनंतापरमेष्ठिनी॥सर्वभेदविनिर्मुक्तासर्वभेदाश्रयानिजा॥१३॥त्वामधिष्ठाययोगेशिपुरुषःपरमेश्वरि
॥प्रधानाद्यंजगत्कृत्स्नंकरोतिविकरोतिच॥१४॥त्वयैवसंगतोदेवःस्वमानंदंसमश्नुते॥त्वमेवपरमानंद

१ स्वकेनिसेनिजंत्रिधिसमरातनिसा ॥

स्त्वमेवानंददायिनी॥१५॥त्वमेवपरमंव्योममहाज्योतिर्निरंजनं॥शिवंसर्वगतंसूक्ष्मंपरंब्रह्मसनातनं॥१६
॥त्वंशक्रःसर्वदेवानांब्रह्माब्रह्मविदामपि॥सांख्यानांकपिलोदेवोरुद्राणामसिशंकरः॥१७॥आदित्यानामुपेंद्र
स्त्वंवसूनांचैवपावकः॥वेदानांसामवेदस्त्वंगायत्रीच्छंदसामपि॥१८॥अध्यात्मविद्याविद्यानांगतीनांपरमा
गतिः॥मायात्वंसर्वशक्तीनांकालःकलयतामपि॥१९॥ॐकारःसर्वगुह्यानांवर्णानांचद्विजोत्तमः॥आश्रमाणां
गृहस्थस्त्वमीश्वराणांमहेश्वरः॥२०॥पुंसांत्वमेवपुरुषःसर्वभूतहृदिस्थितः॥सर्वोपनिषदांदेविगुह्योपनिषदु
च्यसे॥२१॥ईशानंचासिभूपानांयुगानांकृतमेवच॥आदित्यःसर्वमार्गाणांवाचांदेवीसरस्वती॥२२॥त्वंलक्ष्मी
श्चारुरूपाणांविष्णुर्मायाविनामपि॥अरुंधतीसतीनांत्वंसुपर्णःपततामसि॥२३॥सूक्तानांपौरुषंसूक्तंज्येष्ठं
सामचसामसु॥सावित्रीह्यसिजप्यानांयजुषांशतरुद्रियं॥२४॥पर्वतानांमहामेरुरनंतोभोगिनामसि॥सर्वे
षांत्वंपरंब्रह्मत्वन्मयंसर्वमेवहि॥२५॥रूपंतवाशेषकलाविहीनमगोचरंनिर्मलमेकरूपं॥अनादिमध्यांत
मनंतमाद्यंनमामिसत्यंतमसःपरस्तात्॥२६॥यदेवपश्यंतिजगत्प्रसूतिंवेदांतविज्ञानविनिश्चितार्थाः॥आ
नंदमात्रंपरमाभिधानंतदेवरूपंप्रणतोस्मिनित्यं॥२७॥अशेषसत्त्वांतरसन्निविष्टंप्रधानसंयोगवियोगहे

१अर्चिरादिमार्गाणां २ कलाःकलनानिपरिच्छेदाइतियावत्॥कलसंख्याने॥यावत्परिच्छेदशून्यंअपरिच्छिन्नमितियावत्॥

तु॥तेजोमयंजन्मविनाशहीनंप्राणाभिधानंप्रणतोस्मिरूपं॥२८॥आद्यंतहीनंजगदात्मरूपंविभिन्नसंस्थंप्र
कृतेःपरस्तात्॥कूटस्थमव्यक्तवपुस्तवैवनमामिरूपंपुरुषाभिधानं॥२९॥सर्वाश्रयंसर्वजगन्निधानंसर्व
त्रगंजन्मविनाशहीनं॥नतोस्मितेरूपमणुप्रभेदमाद्यंमहत्त्वेपुरुषानुरूपं॥३०॥प्रकृत्यवस्थंत्रिगुणात्मबीज
मैश्वर्यविज्ञानविरागधर्मैः॥समन्वितंदेविनतोस्मिरूपंद्विसप्तलोकात्मकमंबुसंस्थं॥३१॥विचित्रभेदंपुरुषै
कनाथमनंतभूतैर्विनिवासितंते॥नतोस्मिरूपंजगदंडसंज्ञमशेषवेदात्मकमेकमाद्यं॥३२॥स्वतेजसापू
रितलोकभेदंनमामिरूपंरविमंडलस्थं॥सहस्रमूर्धानमनंतशक्तिंसहस्रबाहुंपुरुषंपुराणं॥शयानमंतःस
लिलेतवैवनारायणाख्यंप्रणतोस्मिरूपं॥३३॥दंष्ट्राकरालंत्रिदशाभिवंद्यंयुगांतकालानलकल्परूपं॥अ
शेषभूतांडविनाशहेतुंनमामिरूपंतवकालसंज्ञं॥३४॥फणासहस्रेणविराजमानंभुवस्तलेधिष्ठितमप्रमे
यं॥अशेषभारोद्वहनेसमर्थंनमामितेरूपमनंतसंज्ञं॥३५॥अव्याहतैश्वर्यमयुग्मनेत्रंब्रह्मात्मतानंदरस
ज्ञमेकं॥युगांतशेषंदिविनृत्यमानंनतोस्मिरूपंतवरुद्रसंस्थं॥३६॥प्रहीणशोकंविमलंपवित्रंसुरासुरैरर्चि
तपादयुग्मं॥सुकोमलंदेविविशालशुभ्रंनमामितेरूपमिदंनमामि॥३७॥एतावदुक्त्वावचनंरघुराजकु॥

लोहद्रुहः॥संप्रेक्षमाणोवैदेहींप्रांजलिःपार्श्वतोभवत्॥४८॥अथसातस्यवचनंनिशम्यजगतीपतेः॥सस्मितं
प्राहभर्तारंशृणुष्वेकंवचोमम॥४९॥गृहीतंयन्मयारूपंरावणस्यवधायहि॥तेनरूपेणराजेंद्रवसाम्यभिमा
नसोत्तरे॥५०॥प्रकृत्यानीलरूपस्त्वंलोहितोरावणार्दितः॥नीललोहितरूपेणत्वयासहवसाम्यहं
॥५१॥गृहाणचवरंराममत्तोयदभिकांक्षितं॥तच्छ्रुत्वाराघवोवीरःप्रतिश्रुत्य गिरौस्थितिं॥५२॥भार
द्वाजांशभागेनययाचेपरमेश्वरीं॥देविसीतेमहाभागेदर्शितंरूपमैश्वरं॥५३॥हृद्यान्नापगच्छेतदि
तिमेदीयतांवरः॥भ्रातरोममकल्याणिवानराःसविभीषणाः॥५४॥सेनान्योममवैदेहिअयोध्यायोध
मुख्यकाः॥पुनस्तेसंगताःसंतुमयारावणतर्जिताः॥५५॥एतस्मिन्नंतरेचाभूदाकाशेदुंदुभि स्वनः॥ः
पपातपुष्पवृष्टिश्चरामसीतोपरिद्विज॥५६॥प्रहस्यसीतापुनराहरामंतथेतिरामोपिविरिंचिमुख्यान्
॥सतान्विसृज्यप्रतिगृह्यसीतांगंतुंस्वकंदेशमसावियेष॥ ५७ ॥ ॥इत्यार्षेश्रीमद्रामायणेवाल्मी॥
कीयेआदिकाव्येअद्भुतोत्तरकांडेश्रीरामविजयोनामषड्विंशतितमःसर्गः॥ ॥२६॥ ॥ः॥
रामस्तुपुष्पकारूढःसीतामालिंग्यबाहुना॥अयोध्यामगमद्वीरःकाकुत्स्थकुलनंदनः॥१॥रथनेमिस्व

नंश्रुत्वारामदर्शनलालसाः॥भ्रातरोभरताद्यास्तेयोधमुख्याश्चतेतथा॥२॥राममागतमाज्ञायससीतंसकपिव्रजं॥प्रणेमुःसहसागत्य आनंदाश्रुकणाकुलाः॥३॥वानरान्राक्षसान्सर्वानानाय्यस्वपुरंहिसः॥सर्वंतत्कथयामासरामःकमललोचनः॥४॥तच्छ्रुत्वाविस्मिताःसर्वेसाधुसाध्वितिवादिनः॥सीतांतत्वेनविज्ञायरामंचमधुसूदनं ॥५॥तदेवंचिंतयंतस्तेस्वंस्वंस्थानंययुर्मुदा॥विसृष्टारामभद्रेणसांत्वपूर्वंमहात्मना॥६॥कश्यपश्चाभिनंद्यैनंससीतंरघुनंदनं॥आशीर्भिर्वर्धयामासुर्ययुश्चापियथागतं॥७॥रामोपिसीतयासार्द्धंभ्रातृभिश्चमहात्मभिः॥चक्रेनिष्कंटकांपृथ्वींदेवानांचमहद्धितं॥८॥यज्ञान्बहुविधांश्चक्रेसरयूतीरउत्तमे॥दशवर्षसहस्राणिदशवर्षशतानिच॥किंचिदभ्यधिकंचैवरामोराज्यमकारयत्॥९॥देवकिन्नरगंधर्वाविद्याधरमहोरगाः॥रामंनमंतिसततंगुणारामंरमापतिं॥१०॥एतत्तेकथितंभद्रभारद्वाजमहामते॥तेषुकिंचिदिहाश्चर्यमुक्तंरामकथाश्रयं॥११॥सर्वंनवक्तुमिच्छामिपुनरुक्तिभयाद्द्विज॥ब्रह्मणागोपितंतच्च अतोपिनतदुक्तवान्॥१२॥अद्भुतोत्तरकांडेतत्कथितंवेदसंमितं॥शृणोत्यधीतेयश्चैतत्सब्रह्मपरमाप्नुयात्॥१३॥श्लोकमेकंतदर्धंवाशृणुयाद्यश्चमानवः॥प्रातर्मध्याह्नयोगेवासयातिपरमांगतिं॥१४॥

पंचविंशतिसाहस्त्रंरामायणमधीत्ययत्॥फलमाप्नोतिपुरुषस्तदस्यश्लोकमात्रतः॥१५॥नश्रुतंनाप्यधीतं
वायेनाश्रुतमिदंद्विज॥सगर्भान्निःसृतोनैवयथाभ्रूणस्तथैवसः॥१६॥रामायणमिदंश्रुत्वानमातुर्जठरेवि
शेत्॥वेदाश्चत्वारएकत्रतुलयाचेदमेकतः॥१७॥विधात्रातुलितंशास्त्रंसर्वंदेवाग्रतोद्विज॥इदंतुस
र्ववेदेभ्योगौरवादतिरिच्यते॥१८॥शाक्रायस्वर्णदीतीरेपुरापृष्टोहमब्रुवं॥तदेवतवचाख्यातमद्भुतोत्तर
कांडकं॥१९॥रामायणमहारत्नंब्रह्महृत्तत्क्षीरधावभूत्॥नारदात्तःसमासाद्यक्रमान्ममहृदिस्थितं॥
२०॥तत्सर्वंब्रह्मणोलोकेनिःशेषमवतिष्ठते॥किंचिदुर्व्यांचपातालेत्रिदिवेशक्रसन्निधौ॥२१॥विरंचिर्ना
रदोहंचत्रयएवास्यपारगाः॥चतुर्थोनोपपद्येतबुद्ध्वेदंसुस्थिरोभव॥२२॥यदुक्तमद्भुतेकांडेपुनस्तत्कथ
याम्यहं॥श्रीरामजन्मवृत्तांतःश्रीमतीचरितंमहत्॥२३॥दंडकारण्यकस्यानांशोऽपि॥तेनमहात्मनां॥४
नारदस्यचशापेनलक्ष्म्याश्चैवापराधतः॥२४॥मंदोदरीगर्भनिष्ठावैदेहीजन्मचोक्तवान्॥रामस्यविश्व
रूपंचभार्गवेणचवीक्षितं॥२५॥ऋष्यमूकेहनुमताचतुर्बाहूरघूत्तमः॥दृष्टोभिक्षुस्वरूपेणसुग्रीवसख्यमु
क्तवान्॥२६॥लक्ष्मणांगजतापेनशोषणंवारिधेःपुनः॥प्राप्तराजस्यरामस्यमुनीनांसन्निधौतथा॥२७॥४

---

१ क्षीरसमुद्र

अ॰
दु॰
५५

सीतायाःकथनंश्रुत्वासहस्रास्यस्यरक्षसः॥मानसोत्तरशैलेंद्रेस्थितिंज्ञात्वारघूद्वहः॥२८॥जगामपुष्करद्वीपं
भ्रातृभिःसहवानरैः॥सीतायाऐश्वरंरूपंरावणस्यवधस्तथा॥२९॥अयोध्यागमनंरामस्यैषवृत्तांतसंग्रहः॥
वृत्तांतसंग्रहंचापिपठित्वारामभक्तिमान्॥जायतेमुनिशार्दूलनात्रकार्याविचारणा॥३०॥पठेच्चयोरामचरित्रमे
तत्सुनातिपापात्सुकृतंलभेत॥तीर्थाभिषेकंसमरेजयंचसंसर्वयज्ञस्यमहत्फलंच॥३१॥भजेतयोराममचिंत्य
रूपमेकेनभावेनचभूमिपुत्रीं॥एतत्तुपुण्यंशृणुयात्पठेद्वाभूयोभवेन्नोजठरेजनन्याः॥ ३२॥ ॥इत्यार्षेश्रीम
द्रामायणेवाल्मीकीयेआदिकाव्येअद्भुतोत्तरकांडेश्रीसीतारामयोरयोध्यागमनंनामसप्तविंशतितमःसर्गः
॥२७॥ समाप्तिमगमच्छुभम् ॥ ॥वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥काशीसंस्कृतमुद्रायामङ्कितोयं
शिलाक्षरैः॥१॥श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपर श्रीविश्वनाथजीकेपास महाराजशिवलालदुवे
जीकेमकानमे काशीसंस्कृतमुद्रायंत्रमेछपी जिनकोलेनाहोयउनको इसकार्यकेसंपादकश्रीबाबूवा
राणसीप्रसादजीकेपास याकचौरीगलीमे भाईप्रतापसिंहजीकेदुकानपरमिलैगी॥संबत् १९३८॥४॥
॥मितिवैशाखशुद्ध ११ चंद्रवार॥ तारीख ९ माहेमई सन १८८१ ॥शुभंभूयात्॥ ७ ॥४

रा॰
५५

॥ इतिश्रीमदद्भुतरामायणंसमाप्तम् ॥

```
[OrderDescription]
,CREATED=27.11.19 13:43
,TRANSFERRED=2019/11/27 at 13:54:11
,PAGES=113
,TYPE=STD
,NAME=S0002185
,Book Name=M-369-ADBHUT RAMAYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
```

```
FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
```

```
FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
```

```
FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
```

```
FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
```

```
FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
```

```
FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
```

```
FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,
```